
उल्लासः

प्रवेशिका, चतुर्थः भागः



उल्लासः

प्रवेशिका, चतुर्थः भागः



विद्ययाऽमृतमश्नुते
एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

आमुखम्

राष्ट्रिय-शिक्षा-नीतिः २०२० पञ्चदश-वर्षीयाणाम् अथवा ततः अधिक-आयुःवर्गीयाणां सर्वेषाम् तेषां सर्वेषाम् अपि जनानां साक्षरतानिमित्तम् अवसरनिर्माणे प्रतिबद्धतां करोति। ये जनाः कैश्चिदपि कारणैः अक्षर-संख्ययोः ज्ञानम् अर्जयितुं न शक्तवन्तः। सन्दर्भेऽस्मिन् इति कार्यक्रमः शिक्षा-नीतेः अनुशंसानां क्रियान्वयनार्थं भारत-सर्वकारेण २०२२ तमे वर्षे अप्रेल-मासस्य प्रथमे दिनाङ्के 'उल्लासः' प्रारब्धः। यस्मिन् वयस्क-शिक्षायाः सर्वेऽपि पक्षाः समायोजिताः सन्ति। उल्लासस्य उद्देश्यं केवलम् आधारभूत-साक्षरता एवञ्च संख्याज्ञानम् एव न अस्ति, अपितु २१ शताब्दस्य नागरिकाणां कृते ये आवश्यकाः घटकाः भवन्ति तेषाम् अपि समायोजनम् अत्र क्रियते यथा – महत्त्वपूर्णानि जीवन-कौशलानि (वित्तीय-साक्षरता, अङ्कीय-साक्षरता (डिजिटल-साक्षरता), वाणिज्य-कौशलम्, स्वास्थ्य-संरक्षणम्, जागरूकता, शिशुसंरक्षणम्, शिक्षा एवं परिवारकल्याणम्), व्यावसायिक-कौशल-विकासः (स्थानीय-वृत्तिम् उद्दिश्य) आधारभूता शिक्षा (प्रारम्भिकम्, माध्यमिकं माध्यमिकस्तरस्य च समकक्षतायाः सहितम्) एवञ्च सतत-शिक्षा (कला, विज्ञानम्, प्रौद्योगिकी, संस्कृतिः, क्रीडा मनोरञ्जनं च इत्यादिषु समग्र-प्रौढशिक्षा-पाठ्यक्रमेण सहैव स्थानीयानां शिक्षार्थिनां कृते रुचेः उपयोगस्य च अन्ये विषयाः यथा – महत्त्वपूर्ण-जीवन-कौशलेषु अधिकोन्नतसामग्र्या सह)। अनेन प्रकारेण इयं योजना मानवस्य व्यक्तित्व-विकासं समग्रतया अवलोकयति एवञ्च न्यायसंगतं, तर्कशीलम् एवञ्च उत्कृष्टस्य नागरिकस्य निर्माण-दिशि कार्यं करोति।

'उल्लास'स्य अर्थः वर्तते – समाजे सर्वेषां जनानां कृते आजीवनम् अधिगमस्य बोधः। (ULLAS- Understanding of Lifelong Learning for All in Society) एवञ्च 'जन जन साक्षर' इति उल्लासस्य आदर्शवाक्यं वर्तते। नव-भारत-साक्षरता-कार्यक्रमस्य उल्लासस्य अभिलेखे उल्लिखितं वर्तते यत् २०११ तमे वर्षे कृतायाः जनगणनायाः अनुसारेण देशे पञ्चदश-वर्षीयाणां ततः अधिक-आयुवर्गीयाणां वा अक्षरज्ञानविहीनानां जनानां सङ्ख्या २५.७६ कोटिः (पुरुषाः ०९.०८ कोटिः, महिलाः १६.६८ कोटिः) वर्तते। २००९-२०१० वर्षतः २०१७-२०१८ वर्ष-पर्यन्तं साक्षर-भारत-कार्यक्रमस्य अन्तर्गतं प्रमाणितानां साक्षर-जनानां सङ्ख्यायां ०७.६४ कोटि-परिमितस्य प्रगतिम् अवलोक्य अनुमियते यत् भारते अधुना अपि प्रायः १८.१२ कोटि-परिमिताः वयस्काः अक्षरज्ञानविहीनाः सन्ति।" राष्ट्रिय-शिक्षा-नीतिः २०२० तः २०३० वर्ष-पर्यन्तं १०० प्रतिशतं शतप्रमाणकं साक्षरतार्थं लक्ष्यं निर्धारयति एवञ्च राष्ट्रिय-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-परिषदि राष्ट्रिय-साक्षरता-केन्द्रस्य स्थापनायाः अनुशंसां करोति। अस्य लक्ष्यस्य प्राप्तये राष्ट्रियस्तरे राज्यस्तरे च अनेके प्रयासाः नैरन्तर्येण क्रियमाणाः सन्ति क्रियन्ते।

भवितुमर्हति यत् उल्लासे सम्मिलिताः शिक्षार्थिनः साक्षराः न भवेयुः चेदपि ते शिक्षिताः अवश्यं भविष्यन्ति एवञ्च स्वजीवने समागतानां सङ्गर्षाणां तथा विभिन्न-आह्वानानां च सम्मुखीकर्तुम् एवं च जीवने उचितं निर्णयं स्वीकर्तुं समर्थाः भविष्यन्ति। एते शिक्षार्थिनः स्व-जीवनस्य विविधेषु सन्दर्भेषु स्वभाषायाः अन्यभाषाणां वा मौखिक प्रयोगं च कुर्वन्ति एवञ्च गणितीयावबोधेन सह स्व-कार्येषु विनिमयम् अपि कुर्वन्ति। पठनं लेखनं सङ्ख्याज्ञानं चैव एतेषाम् आवश्यकता यया तेषां गुणवत्तापूर्णस्य च जीवनस्य मार्गः प्रशस्तः भवेत्।

साक्षरता काचित् बृहदवधारणा वर्तते, या केवलम् अक्षरज्ञान-सङ्ख्याज्ञान-पर्यन्तं परिसीमिता नास्ति, अपितु "विभिन्नेषु सन्दर्भेषु विषयाणां दृश्य-श्रव्य-अङ्कीय-उपकरणानाम् उपयोगेन सञ्ज्ञानस्य, अवगमनस्य,

साक्षरता काचित् बृहदवधारणा वर्तते, या केवलम् अक्षरज्ञान-सङ्ख्याज्ञान-पर्यन्तं परिसीमिता नास्ति, अपितु "विभिन्नेषु सन्दर्भेषु विषयाणां दृश्य-श्रव्य-अङ्कीय-उपकरणानाम् उपयोगेन सञ्ज्ञानस्य, अवगमनस्य, रचनायाः, गणनायाः संवादस्य च क्षमता वर्तते ।" (अन्ताराष्ट्रिय-साक्षरता-सङ्घः (आई.एल.ए.) उद्धृतम्) । अनेन प्रकारेण आधारभूत-साक्षरता संख्याज्ञानं च प्रकार्यात्मकम् अस्ति, एवञ्च उत्तमतया जीवनयापने सहायकम् अस्ति ।

"आधारभूत-साक्षरतायाः प्राप्तिः, शिक्षायाः प्राप्तिः, जीवनोपार्जनस्य च अवसर-प्राप्तिः प्रत्येकं भारतीयस्य अधिकारः अस्ति । साक्षरता एवञ्च आधारभूत-शिक्षा कस्यचिदपि वैयक्तिकम्, नागरिकम्, सामाजिकम्, आर्थिकम् एवञ्च जीवनपर्यन्तं शिक्षायाः अवसराणाम् अनेकानि नूतनस्य जगतः द्वाराणि उद्घाटयति । एतत् नूतनं जगत् वैयक्तिकस्तरे व्यावसायिकस्तरे च अभिवर्धनार्थं सहायकं भवति ।" राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्याः परिप्रेक्ष्यं (विषयम्) मनसि संस्थाप्य शिक्षामन्त्रालयस्य नवभारत-साक्षरता-कार्यक्रमस्य अन्तर्गतं निरक्षराणां शिक्षार्थिनां कृते चतुर्षु भागेषु एतस्याः उल्लास-प्रवेशिकायाः निर्माणं कृतम् अस्ति । एताः प्रवेशिकाः समेकितरूपेण निर्मिताः सन्ति, यासु गणितं भाषा च द्वयमपि सम्मिलितम् अस्ति । विषयरूपेण १३ विषयाः सुनिश्चिताः सन्ति ये प्रायः अस्माकं समीपे दृश्यन्ते श्रूयन्ते प्रयोज्यन्ते च । ते च विषयाः – परिवारः प्रतिवेशः च, संवादः, अस्माकं जीवनशैली, अस्माकं परिवेशः, आहारः स्वास्थ्यं च, मतदानम्, न्यायसम्बद्धं ज्ञानम्, विभिन्नाः आपदः, समयः एव करोति बलाबलम्, यात्रा, मनोरञ्जनम्, वित्तीय-साक्षरता, अङ्कीय-साक्षरता इति । भाषायाः अन्तर्गतम् एतैः विषयैः एव युक्तानि सार्थकानि रोचकवस्तूनि एवञ्च प्रतिदिनम् आवश्यकानाम् आयव्ययादीनां ज्ञानाय संस्कृतभाषायाः अंकगणितस्य च पठनाय अवसराः कल्पिताः सन्ति । शिक्षार्थिनां पठनस्य लेखनस्य अंकगणितस्य च शिक्षणाय सारल्यं भवेत् इत्येतदर्थम् एतस्याः मार्गदर्शिकायाः अपि निर्माणं कृतम् अस्ति । एषा मार्गदर्शिका शिक्षकाणां सहयोगिनां च उपयोगाय निर्मिता वर्तते । अनेन शिक्षार्थिनां शिक्षणे इतोऽपि सारल्यं भविष्यति । अस्यां मार्गदर्शिकायां साक्षरतायाः व्यापकं परिप्रेक्ष्यं, भाषायाः गणितस्य च शिक्षणबिन्दवः एवञ्च अधिगमप्रक्रियायाः विषये विस्तृता चर्चा वर्तते । प्रवेशिकासु मार्गदर्शिकायां च प्रदत्ताः बिन्दवः परामर्शाय वर्तन्ते । शिक्षार्थिनां स्तरं, क्षमताम्, आवश्यकताः एवञ्च स्थानीय-परिवेशं ज्ञात्वा एतेषु आवश्यकतानुसारं परिवर्तनं कर्तुं शक्यते ।

'उल्लासः' प्रवेशिकायां प्रामुख्येण सुविचार्य शिक्षार्थिनां स्वयंसेविनां शिक्षकाणां च कृते आधारभूत-साक्षरतया संख्याज्ञानेन च सम्बद्धानां शिक्षणबिन्दूनाम् अन्तर्जालीय-प्रतिमानानाम् अथवा चलच्चित्राणां निर्माणम् अपि कृतम् अस्ति, यत् 'दीक्षामञ्चे' (DIKSHA Portal) सर्वेषां कृते शिक्षा (सभी के लिये शिक्षा) इति वर्टिकल एवञ्च एनसीईआरटी इत्यस्य 'यूट्यूब चैनल' @NCERTOFFICIAL इत्यस्मिन् उपलब्धम् अस्ति । मार्गदर्शिकायाः चलच्चित्रकार्यक्रमस्य च सहयोगेन शिक्षार्थिनां शिक्षणाधिगमे सहयोगः प्राप्यते ।

परिषद् प्रवेशिकानां मार्गदर्शिकानां च निर्माणे सम्मिलितानां सर्वेषाम् अपि विषय-विशेषज्ञानाम् एवञ्च परिषदः संकाय-सदस्यानां परियोजनायाः कार्यकर्तृणां च परिश्रमस्य कृते कृतज्ञतां प्रकटयति । तथैव तेषां सर्वेषां रचनाकाराणां संस्थाः प्रति अपि वयं कृतज्ञाः स्मः, ये याश्च अस्माकं पुस्तके स्वस्य सामग्रीः प्रयोक्तुम् उदारतापूर्वकं सहयोगं कृतवन्तः / कृतवत्यः । एतासां प्रवेशिकानां परिष्कारार्थम् उत्तरोत्तरम् अभिवर्धनार्थं च भवतां/भवतीनां परामर्शानां वयं स्वागतं कुर्मः ।

दिनेश प्रसाद सकलानी
निदेशकः
राष्ट्रिय-शैक्षिक-अनुसंधानम्
एवञ्च प्रशिक्षण-परिषद्

सितंबरमासः २०२४
नवदेहली

स्वयंसेवि-शिक्षकैः सह वार्तालापः

आधारभूतसाक्षरता सङ्ख्याज्ञानं च (प्रौढशिक्षा) भारतसर्वकारद्वारा प्रायोजितायाः उल्लास-नामक-योजनायाः कश्चन महत्त्वपूर्णः भागः । यस्य उद्देश्यं तु पञ्चदशवर्षीयाणां पञ्चदशाधिकवर्षीयाणां च शिक्षार्थिनां साक्षरता वर्तते । उल्लासयोजनायां तेषां/तासां पठन-लेखनयोः सङ्ख्यायाः च शिक्षणं कर्तव्यम्, ये/याः केनापि कारणेन विद्यालयीयशिक्षां न प्राप्तवन्तः/प्राप्तवत्यः अथवा न अनुवर्तितवन्तः/अनुवर्तितवत्यः । अतः सामाजिकचेतनाकेन्द्रं ये निरक्षराः शिक्षार्थिनः आगच्छन्ति अथवा अन्ये भवतां सम्पर्के ये निरक्षराः शिक्षार्थिनः सन्ति, ते पठन-लेखन-प्रक्रियायां विभिन्नस्तरयुक्ताः भवितुम् अर्हन्ति ।

अस्माभिः इदम् अपि अवगन्तव्यं यत् एते शिक्षार्थिनः विवेकिनः, जीवनानुभविनः च सन्ति इति । ते प्रतिकूलपरिस्थितौ अपि जीवनं यापितवन्तः एवञ्च परिस्थितिम् अनुकूलां कर्तुम् अपि जानन्ति । प्रायः एतेषु बहवः गृहे अथवा बहिः कस्मिंश्चित् कार्ये संलग्नाः अथवा किमपि उत्तरदायित्वं निर्वहन्तः स्युः । एतद् अस्माकम् उद्देश्यम् अस्ति यत् पठनलेखनाभ्यासेन एवञ्च गणितज्ञानेन तेषां जीवनं इतोऽपि सरलं भवेत्, एवञ्च तेषाम् अनुभवं ते इतोऽपि गभीरं विस्तृतं च कर्तुं शक्नुयुः इति । एतेन प्राप्तां क्षमतां जीवनस्य विभन्नासु परिस्थतिषु उपयोक्तुम् अपि शक्नुयुः । एतेन तेषाम् आत्मविश्वासः इतोऽपि वर्धेत ।

स्वयंसेवि-शिक्षकैः एतत् ज्ञातव्यम् –

- यान् शिक्षार्थिनः वयं साक्षरान् कर्तुम् इच्छामः ते पञ्चदशवर्षीयाः पञ्चदशाधिकवर्षीयाः च सन्ति । कदाचित् ते अस्माकम् अपेक्षया अनुभविनः स्युः । अतः अस्माभिः तेषाम् अनुभवस्य आदरः करणीयः ।
- ते स्वीयानि नित्यकार्याणि स्वीयशैल्या एव कुर्वन्ति । तेषां कौशलस्य अपि अस्माभिः आदरः करणीयः ।
- पठनम् उपयोगीति यदा ते चिन्तयेयुः तदा एव ते पठेयुः । पूर्णतया सिद्धाः भूत्वा एव तान् अध्यापयन्तु येन अधिगमस्य पूर्णं लाभं ते प्राप्तुं शक्नयुः । एतद्द्वारा वयं बहु किमपि नूतनं ज्ञातुं शक्नुमः एवञ्च अस्माकम् आत्मविश्वासः अपि वर्धेत । अतः वयं पूर्णतया सिद्धाः भूत्वा परिश्रमेण आदरेण च शिक्षार्थिनः पाठयेम ।
- **उल्लास**-प्रवेशिका संस्कृतभाषायाः गणितस्य च एकीकृतं स्वरूपम् अस्ति । अत्र प्रत्येकं पाठे संस्कृतभाषायाः क्षमतानां गणितीयक्षमतानां च विकासाय पर्याप्तावसराः कल्पितास्सन्ति ।
- शिक्षार्थिनः प्रायः संस्कृतेन भाषितुं संस्कृतम् अवगन्तुं च समर्थाः एव, किन्तु पठनस्य लेखनस्य वा अवसरः न प्राप्तः इत्यतः ते पठने लेखने च कष्टम् अनुभवन्ति । केषाञ्चित् शिक्षार्थिनाम् अक्षरज्ञानम् अपि स्यात् । एवमेव कश्चन गणितस्य मौखिकप्रयोगे कुशलः स्यात् एवञ्च अनौपचारिकरूपेण गणनां कर्तुम् अपि समर्थः स्यात्, किन्तु अङ्कानाम् अवगमने गणितीय-समस्यानां च परिहारे समस्या स्यात् ।

- पाठेषु सर्वेषां चित्राणां, कथानां, कवितानाम् अथवा अन्यस्याः कस्याश्चित् रोचक-सामग्र्याः माध्यमेन संस्कृतभाषायाः अक्षराणि, नूतनशब्दाः, पाठ्यवस्तुनः पठनं लेखनं च शिक्षितम् अस्ति । अस्याः एव पाठ्य-सामग्र्याः सन्दर्भे गणिताङ्काः गणनं च गणितीय-समस्यानां समाधानं च शिक्षितम् । यदि अपेक्षितं तर्हि वयम् अस्माकम् इच्छानुसारं शिक्षण-बिन्दूनाम् आधारेण अन्यासां पाठ्य-सामग्रीणाम् अपि उपयोगं कर्तुं शक्नुमः । वयं शिक्षार्थिनां स्तरानुसारं, क्षमतायाः अनुसारम् आवश्यकतानाम् अनुसारं च पाठ्य-सामग्र्याः सङ्ग्रहणं कर्तुं शक्नुमः ।
- प्रवेशिकायां प्रदत्तानां चित्राणां पूर्णतया प्रयोगं कर्तुं शक्नुमः । अनुमानेन पठनं लेखनं च शिक्षयितुं चित्राणि सहायकानि भवन्ति । कस्मिंश्चित् चित्रे एकम् एव वस्तु भवितुम् अर्हति । कस्मिंश्चित् चित्रे काचित् पूर्ण-प्रक्रिया घटना वा भवितुम् अर्हति । अतः आवश्यकतायाः अनुसारं चित्राणां प्रयोगं कर्तुं शक्नुमः । चित्राणि शिक्षार्थिनः चर्चां कर्तुं वा स्वानुभवान् वक्तुं वा प्रेरयन्ति ।
- ***उल्लास-प्रवेशिकायाः*** लेखनार्थं शिक्षार्थिभ्यः प्रथमपृष्ठे विशेषरूपेण पर्याप्तं स्थलं प्रदत्तम् अस्ति तत्र ते स्वस्य नाम, गृहसङ्केतं, सम्पर्कविवरणानि (चलदूरवाणी-सङ्ख्या इत्यादि) लेखितुं शक्नुवन्ति । शिक्षार्थिनः स्वजीवने स्वस्य नाम-आदिकं लेखितुम् अनेकान् अवसरान् प्राप्नुवन्ति । एतत् कार्यं तेषां जीवनेन सह सम्बद्धम् अस्ति । कदाचित् कश्चन शिक्षार्थी स्वस्य नाम लेखितुं न शक्नुयात् । तदा अध्यापकः तस्य नाम, गृहसङ्केतं, चलदूरवाणी-सङ्ख्यां च लिखित्वा प्रदर्शयेत् । दृष्ट्वा लेखितुं शिक्षार्थिनः सहायतां च कुर्यात् ।
- ***उल्लास-प्रवेशिकायाः*** चतुर्णाम् अपि भागानाम् अन्ते संस्कृतभाषायाः वर्णमाला प्रदत्ता अस्ति । अस्याः उद्देश्यम् अस्ति यत् शिक्षार्थिनः संस्कृतभाषायाः अक्षराणि अवगच्छन्तु इति । परन्तु अस्य आरम्भः तु उचितसामग्र्या एव भवेत् । यदा ते अक्षराणां परिचयं प्राप्नुवन्ति तदा वर्णमाला-द्वारा अक्षराणाम् अवगमनं कारयितुं शक्यते । यः शिक्षार्थी पूर्वमेव संस्कृतभाषायाः अक्षराणि जानाति सः वर्णमाला-युक्तस्य पृष्ठस्य उपयोगम् आरम्भे एव कर्तुं शक्नोति ।
- संस्कृत-वर्णमालायाः पुनः पुनः दर्शनेन शिक्षार्थिनाम् अक्षराणां सञ्ज्ञानं सुदृढं भवति । ते अनुमानेन अक्षराणाम् अवगमनार्थं पठनार्थं लेखनार्थं च अस्य कौशलस्य उपयोगं कर्तुं शक्नुवन्ति ।
- संस्कृतस्य अक्षराणाम् अवगमनार्थं भाषा-क्रीडानाम् आयोजनं कर्तुं शक्यते । उदाहरणार्थम् – संस्कृतस्य केनचित् निर्दिष्ट-अक्षरेण शब्दनिर्माणम्, कस्यचित् शब्दस्य अन्तिम-अक्षरेण अग्रिमशब्दस्य निर्माणम्, शब्दानां पठनम् इत्यादयः । निर्दिष्टमात्रया युक्तस्य शब्दस्य निर्माणम्, पठनं लेखनम् इत्यादि-क्रीडाः अपि कारयितुं शक्यते ।
- संस्कृत-अक्षराणाम् अक्षर-जालं निर्माय तस्मिन् जाले शब्दानाम् अन्वेषणं कर्तुं सूचयतु । एतस्मिन् अक्षर-जाले ज्ञातानाम् अक्षराणां मात्राणां च उपयोगः भवतु ।
- प्रवेशिकायाः अन्ते प्रदत्तां वर्णमालां शिक्षार्थिनः पठनसमये लेखनसमये वा कदापि द्रष्टुं शक्नुवन्ति । पठनार्थं लेखनार्थं च ते वर्णमालायाः प्रयोगं कर्तुं शक्नुवन्ति ।

शिक्षार्थिनाम् अध्यापन-काले ध्यातव्याः विषयाः

- **स्वशिक्षार्थिनः जानन्तु** – अस्माभिः ज्ञातव्यं यत् ते शिक्षार्थिनः सर्वथा पठितुं लेखितुं न शक्नुयुः, अथवा पूर्वमेव किञ्चित् पठितुं जानीयुः, अथवा केवलम् अक्षराणि एव परिचिनुयुः, अथवा केवलं स्वनाम लेखितुं शक्नुयुः। इदमपि स्यात् यत् तेषां सङ्ख्याज्ञानं न स्यात् अथवा ते गणितीयसङ्ख्याः औपचारिकगणनाविधीन् च जानीयुः। तेषां रुचिः, अरुचिः, सुखम्, दुःखम्, परिवारः, चिन्ता, संघर्षाः च ज्ञातव्याः, येन यदा वयं शिक्षण-अधिगमप्रक्रियाम् आरभामहे तदा तेषां जीवनस्य घटनाः मनसि कृत्वा वार्तालापं कर्तुं शक्नुयाम। ते अस्माकं वार्तालापेन प्रोत्साहनं प्राप्य सशक्ततां अनुभवेयुः। अस्माकम् आत्मीयता तेषां जीवनस्य अनेकेभ्यः दुःखदायकेभ्यः पक्षेभ्यः तेषां ध्यानं विचालयितुं शक्नुयात्।
- **शिक्षण-अधिगम-क्रिया मनोरञ्जनात्मिका भवेत्** - भवन्तं / भवतीं परितः बहूनि वस्तूनि भविष्यन्ति यानि पाठस्य अध्यापनार्थम् उपयोगीनि भवितुम् अर्हन्ति। पाठनसम्बद्धानाम् उपलब्धानां सामग्रीणां यथा - वार्तापत्रम्, पत्रिका, विज्ञापनम्, विद्युद्-व्यय-पत्रकम्, रेलयानस्य चिटिका च इत्यादीनां समुचितरूपेण उपयोगं कुर्वन्तु।
- **शिक्षार्थिभ्यः स्वविचारान् प्रकटयितुम् अवसराः कल्पनीयाः** – शिक्षण-काले स्वयमेव अधिकं न वक्तव्यम्, अपितु शिक्षार्थिभ्यः चर्चां कर्तुं स्वविचारान् प्रकटयितुं च पर्याप्ताः अवसराः प्रदातव्याः। एतत् भवितुमर्हति यत् वयं बहु-सूचनां दातुम् इच्छामः, परन्तु अस्माभिः स्मर्तव्यं यत् अस्माकं शिक्षार्थिनः पूर्वमेव बहु किमपि जानन्ति, अतः तेषां ज्ञानस्य अनुभवानां च लाभं स्वीकर्तुं शक्नुमः। तदर्थं तेषां धन्यवादज्ञापनं न विस्मरणीयम्।
- **अतिरिक्त-पठन-सामग्रीणां प्रयोगं कुर्वन्तु** – उल्लास-प्रवेशिकायाः प्रत्येकं पाठं पठित्वा तत्सम्बद्धानां विभिन्नप्रकारकाणां सार्थक-पठन-सामग्रीणां सङ्ग्रहणं कुर्वन्तु, एषा सामग्री रुचिकरी भवेत् एवञ्च समीपे एव उपलब्धा भवेत्। अनेन पठितस्य पाठस्य अवगमनं सौकर्याय भविष्यति, शिक्षार्थिनः तया सह सम्बद्धाः भवितुम् अर्हन्ति।
- **शिक्षार्थिनः प्रति संवेदनशीलः सकारात्मकः च दृष्टिकोणः भवेत्** – यदि वयं वयसा कनिष्ठाः स्मः, ते ज्येष्ठाः सन्ति, तर्हि ते अस्माकं कथनं गभीरतया न शृण्वन्ति इति न चिन्तनीयम्। ते, भवतः बहु सम्माननं प्रेम च करिष्यन्ति, यतो हि वयं तेषां पठनं, लेखनं, सङ्ख्यां च शिक्षितुं साहाय्यं कुर्मः। भवान् अतीव बुद्धिमान्, अनुभवी, संवेदनशीलः च अस्ति, तथापि तेषां कार्ये, वेषभूषायाम्, उच्चारणे, शिष्टाचारे वा किमपि नकारात्मकं कथनं न कथनीयमिति।
- **शिक्षार्थिनां सौकर्यं मनसि धारयन्तु** – शिक्षार्थिनाम् अनुसारेण शिक्षण-अध्ययनयोः समयः, स्थानं, सीमा इत्यादीन् निर्धारयन्तु। शिक्षार्थिनां कृते उपवेशनस्य व्यवस्था एतादृशी भवेत् येन ते सुखपूर्वकम् उपवेष्टुं शक्नुयुः, एवञ्च यदा वयं तान् अक्षराणां शब्दानां च उच्चारणं कृत्वा दर्शयामः तदा ते सहजतया द्रष्टुं शक्नुयुः। कटाः आसन्दाः इत्यादीनां व्यवस्था पूर्वमेव करणीया येन वयोवृद्धानां येषां जानुवेदना स्यात् तेषां कृते एकहोरां होराद्वयं वा उपवेशने असौकर्यं न भवेत्।

- **आधार-भूतानाम् आवश्यकतानां व्यवस्था** – यत्र वयं शिक्षार्थिनः पाठयामः तत्र जलस्य व्यवस्था भवेत्। पर्याप्तरूपेण प्रकाशः च भवेत् येन तेषां नेत्रयोः पीडा न भवेत्।
- **शिक्षार्थिनाम् अनुभवस्य कौशलस्य च सम्माननं कुर्वन्तु** – अस्माकं शिक्षार्थिनः जीवनानुभविनः सन्ति। यदि भवान् पठने लेखने शिक्षणे च एतेषाम् अनुभवानां पूर्णं लाभं प्राप्नुयात् तर्हि भवतः कृते पठनं लेखनं शिक्षणं च सुकरं भविष्यति। अस्माकं शिक्षार्थिनः कर्मकराः सन्ति, ते विभिन्नप्रकारकं कौशलं जानीयुः। तेषां कार्यसम्बद्धस्य शब्दकोशस्य, गणितीय-कौशलस्य च पठन-लेखन-शिक्षणे सदुपयोगः कर्तुं शक्यते। पठनलेखनयोः दृष्ट्या भवतः / भवत्याः अवगमनम् अधिकम् अस्ति, परन्तु कार्यस्य जीवनस्य च अनुभवः तेषाम् अधिकं भवेत्। भवान् / भवती तान् आदरपूर्वकं सम्बोधयिष्यति, तेषां वयसः अनुभवानां च पूर्णं सम्माननं करिष्यतीति अपेक्षा।
- **शिक्षार्थिनाम् अधिगम-प्रक्रियां जानन्तु** – भवितुमर्हति यत् अद्य भवता यत् पाठितं तत् ते द्वित्रदिनानाम् अनन्तरं विस्मरेयुः। एतत् अतीव स्वाभाविकम् अस्ति। अतः यत् पूर्वं ज्ञातं तत् पुनः पुनः अभ्यासं कर्तुं तेषां प्रोत्साहनं करणीयम्। प्रत्येकं शिक्षार्थिनः गतिः शिक्षणस्य पद्धतिः च भिन्ना भविष्यति, एतत् मनसि निधाय तेषां स्वगत्या पद्धत्या च शिक्षणं कर्तुं साहाय्यं कुर्वन्तु। शिक्षणे परिवर्तने च कश्चन कालः अपेक्षितः भवति एव अतः धैर्यं धारयन्तु। केन्द्रस्य वातावरणं रुचिकरं कर्तुं मध्ये मध्ये मनोरञ्जनार्थं क्रीडादीनाम् आयोजनं कुर्वन्तु। उत्सवानुसारं गीतानि च गायन्तु। गीतैः, कथाभिः अनुभवेन च वयं शिक्षणाधिगमप्रक्रियायै पाठ्यबिन्दून् संयोजयितुं शक्नुमः। एतेन शिक्षणाधिगमप्रक्रियां रुचिकरं कर्तुं शक्नुमः। शिक्षणार्थं प्रेरणादायकम् आनन्ददायकं च वातावरणम् अत्यावश्यकम् अस्ति।

आधारभूतविषयाणां सङ्ख्यायाः च शिक्षणाधिगमप्रक्रियायाः विषये भवतः / भवत्याः परामर्शानां स्वागतम् अस्ति।

शुभकामनाः

उषा शर्मा
आचार्या प्रभारिणी च
राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः
रा.शै.अ.प्र.प., नवदेहली

निर्माण-समितिः

अध्यक्षः

दिनेश प्रसाद सकलानी, निदेशकः, रा.शै.अ.प्र.प. नवदेहली

परामर्शः

चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली
प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
अनूप कुमार राजपूत, आचार्यः (प्रोफेसर) एवम् अध्यक्षः, प्रकाशनप्रभागः, रा.शै.अ.प्र.प. नवदेहली
रंजना अरोड़ा, आचार्या (प्रोफेसर) एवम् अध्यक्षा, पाठ्यचर्या अध्ययनविभागः, रा.शै.अ.प्र.प. नवदेहली
संध्या सिंह, आचार्या (प्रोफेसर) एवम् अध्यक्षा, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प. नवदेहली
श्रीधर श्रीवास्तव, संयुक्तनिदेशकः, रा.शै.अ.प्र.प. नवदेहली

निर्माण-समितिः

डॉ.मनमोहन शर्मा, शोधाध्येता, संयोजकः 'उल्लासः प्रवेशिका' (संस्कृतम्) संस्कृतसंवर्धनप्रतिष्ठानम्
प्रदीप पौडेल, शोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
विष्णु प्रसाद उपाध्याय, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
गानमूर्ति, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.श्रीधर, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
खगेन्द्र दहाल, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
राम शर्मा, शोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
प्रवीण न्यौपाने, शोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
उमेश कुमार पाण्डेय, अनुवादकः संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
नरेन्द्र शर्मा, अनुवादकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
जया टंडन, अनुवादिका, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
सुनील कुमार शर्मा, परियोजना-सहायकः भारतीयज्ञानपरम्परा, नवदेहली

समीक्षा-समितिः

प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.जितेन्द्र मोहन शर्मा, आचार्यः, रा.शै.अ.प्र.प. नवदेहली
डॉ.देवकीनन्दन, सहायकाचार्यः, रा.शै.अ.प्र.प. नवदेहली
डॉ.नितिन कुमार जैन, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
डॉ.परमेश कुमार शर्मा, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
लक्ष्मीनरसिंहन्, कार्यपालकाधिकारी, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.मनमोहन शर्मा, वरिष्ठशोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्

समन्वयन-सदस्या

उषा शर्मा, आचार्या एवं प्रभारिणी, राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

कृतज्ञता

अस्मिन् पुस्तके येषां साहित्यरचनाः स्वीकृताः परिषद् तेषां सर्वेषां विदुषां कृतज्ञतां प्रकटयति । रचनानां प्रकाशनाय अनुमतिं प्रदत्तवन्तं भोपाल-नगरस्य 'एकतारा' इति संस्थायाः निदेशकं सुशीलशुक्लं, (दीपावल्याः प्रदीप्ताः दीपकाः); भोपाल-नगरस्य, लोक-चित्रकारं सुभाषव्यामं दुर्गाबाईव्यामं च, (जलवाहिनी), स्वर्गवासिनं निरङ्कारदेवसेवकं (समयस्य अनुपालनम्), श्यामसुशीलं (वर्णगीतम्), प्रभातम् (ज्ञानुः ज्ञानी ज्ञानं तथा च सेव्यतां संस्कृतम्), निशातफ़ारूकम् (सहायता तु प्राप्ता किन्तु कथं एवञ्च मम लेखा मम प्रतिष्ठा), लोक-कथा-निमन्त्रणम्, (अनुपम कहानियाँ) (सेवानिवृत्तम्) कार्यकारि-निदेशकं (रेलवेबोर्ड) प्रेमपालशर्माणम् (गान्धिनः आत्मकथायाः), अजमेर-नगरस्य क्षेत्रीय-शिक्षा-संस्थानस्य शिक्षा-विभागस्य अध्यक्षम् आयुष्मान्-गोस्वामिनं (कथाः) च प्रति परिषद् कार्तज्ञ्यं प्रकटयति ।

पुस्तके चित्राङ्कनाय इयं परिषद् नव-देहलीनगरस्य शशि-शेट्ये-वर्यं; राजस्थान-राज्यस्य जयपुर-नगरस्य लोकचित्रकारिकां (माण्डना शैली) सुनीतां; मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) सुभाष-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारिकां (गोंड-भित्ति-शैली) दुर्गाबाई-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) मानसिंह-व्यामं, राजस्थान-राज्यस्य उदयपुर-नगरस्य प्रशान्त-सोनीं, उत्तर-प्रदेशस्य नोएडा-नगरस्य सागर-अरणकल्ले-वर्यं, मध्य-प्रदेशस्य चंदेरी-नगरस्य शुभम-लखेरां, मध्य-प्रदेशस्य ग्वालियर-नगरस्य हबीब-अलीं, मध्य-प्रदेशस्य देवास-नगरस्य जितेन्द्र-चौरसियां, मध्य-प्रदेशस्य धार-नगरस्य हरिओम पाटीदारं, नीलेश-गहलोतं, नव-देहलीनगरस्य तापोशी-घोषालं, नव-देहलीनगरस्य रुचिन-सोनीं, पश्चिम-बङ्गाल-राज्यस्य कोलकाता-नगरस्य मयूख-घोषं, बिहार-राज्यस्य मधुबनी-नगरस्य सच्चिदानन्द-झां, ओडिशा-राज्यस्य भुवनेश्वर-नगरस्य राधाश्याम राउतं बिहार-राज्यस्य मधुबनी-नगरस्य श्रेयसी-दत्तं प्रति च विशिष्टां कृतज्ञतां विज्ञापयति ।

परिषदा भारतीय-निर्वाचन-आयोगस्य, राष्ट्रिय-मतदातृ-सेवा-सञ्जालस्य, भारतीय-कृषि-अनुसन्धान-केन्द्रस्य, सामाजिक-न्याय-अधिकारिता-मन्त्रालयस्य, प्रधानमन्त्रि-जन-धन-योजनायाः, राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणस्य, राष्ट्रिय-साक्षरता-मिशन-प्राधिकरणस्य, मध्य-प्रदेशस्य इन्दौर-नगरस्य राज्य-संसाधन-केन्द्रस्य च कृतज्ञता मन्यते यस्य जालपुटात् प्रवेशिकायाः निर्माणार्थम् उपयोगिन्यः सामग्र्यः चित्राणि च स्वीकृतानि ।

परिषद् प्रवेशिकायाः विकासाय विभिन्न-चरणेषु सहयोगाय राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठस्य परामर्शदातारं अमनगुप्ता-महोदयं प्रति एवञ्च नवदेहलीस्थितस्य संस्कृतसंवर्धनप्रतिष्ठानस्य परियोजना-अधिकारिणं शंकरलाल-सोनी-वर्यं, पुस्तकस्वरूपं (Indigene work) प्रदत्तवतः रीता-विनोद-पङ्कज-इत्येतान् (मुक्तकर्मिणः) प्रति एवञ्च ग्राफिक-विन्यासकारिके सोनम-मितालयौ प्रति च कृतज्ञतां प्रकटयति । एतेषां/एतासां महता सहयोगेन इदं कार्यं निर्विघ्नतया सुसम्पादितम् ।

यदि भवान्/भवती.....



पठनम् एवं परीक्षाम् आश्रित्य



वैयक्तिक-सम्बन्धान् आश्रित्य



आजीविकाम् आश्रित्य



मित्राणां दुर्व्यवहारेण च

पीडितः/पीडिता, चिन्तितः/चिन्तिता वर्तते तर्हि परामर्शकस्य सहायतां स्वीकरोतु।



राष्ट्रिया निश्शुल्क-परामर्श-दूरभाष-संख्या
प्रातः ८ वादनतः रात्रौ ८ वादन-पर्यन्तम्
प्रतिदिनम्।

मनोदर्पणम्

कोविड-१९ इत्यस्य प्रकोप-काले तत्पश्चादपि विद्यार्थिनां मानसिक-स्वास्थ्य-लाभार्थम्
एवं कल्यार्थं मनोसामाजिक-सहायता
(आत्मनिर्भर-भारत-अभियानस्य अन्तर्गतः, शिक्षा मन्त्रालयः, भारत-सर्वकारस्य एकः उपक्रमः)

www.https://manodarpan.education.gov.in

विषयसूची

आमुखम् *iii*

स्वयंसेवि-शिक्षकान् उद्दिश्य *v*

११. मनोरञ्जनम् **३०५–३२४**

- निःशुल्कम् एव
- त्रिकोणः, वर्गः, आयतम्, वृत्तम् इत्यादीनाम् आकृतीनां परिचयः।
- आकृतीनां सङ्ख्यानां च अनुक्रमस्य ज्ञानम्।
- जलवाहिनी
- मायावी नेयदीपः

१२. वित्तीय-साक्षरता **३२५–३४५**

- मम लेखा मम प्रतिष्ठा
- वित्तकोषे लेखायाः उद्घाटन-सम्बद्ध-विषयाणाम् उपयोगः।
- वित्तकोष-सम्बद्धानां प्रपत्राणां पठनम्, अवगमनं पूरणं च।
- दानस्य गणना

१३. डिजिटल साक्षरता **३४६–३६४**

- मार्गः सुगमः सञ्जातः
- अङ्कीय-सङ्ख्यानाम् अवगमनं लेखनं च।
- चित्रे प्रदर्शितस्य सङ्ख्यात्मक-विवरणस्य ज्ञानम्।
- नित्यजीवने चलदूरवाण्या संबद्धानां समस्यानां परिहारः।
- चलदूरवाण्याः लोकः

मम पुस्तकम्


नाम - _____

पत्र-सङ्केतः - _____

_____

चल-दूरवाणी-सङ्ख्या - _____


मनोरञ्जनम्



वार्तालापाय

नित्यजीवने वयं मनोरञ्जनार्थं गीतं गायामः, वाद्यं वादयामः, कथां शृणुमः श्रावयामः च चलच्चित्रं नाटकं वा पश्यामः । चित्रे किं किं प्रचलति ? तस्मिन् विषये वार्तालापं कुर्मः ।

अस्माकं नित्यजीवने मनोरञ्जनार्थं कानि कानि साधनानि सन्ति ? अस्मिन् विषये अपि सम्भाषणं कुर्मः । चित्रे तेषु वस्तुषु गोलं कुर्मः ।



११ मनोरञ्जनम्

वयं ज्ञास्यामः

- त्रिकोणः, वर्गः, आयतम्, वृत्तम् इत्यादीनाम् आकृतीनां परिचयम्।
- आकृतीनां सङ्ख्यानां च अनुक्रमस्य ज्ञानम्।

निःशुल्कम् एव

कदाचित् भिक्षुलालः नारिकेलं खादितुम् इष्टवान्, परन्तु गृहे एकम् अपि नारिकेलं न आसीत्।
"अहो! मया इदानीं विपणिः गन्तव्या भविष्यति" इति सः पत्नीं लाभिकां वदति।
तदा लाभिका वदति - "यदि भोक्तव्यं तर्हि गन्तव्यम् एव।"
पुनः भिक्षुलालः वदति - "धनस्य व्ययः करणीयः भविष्यति भोः !"
लाभिका पुनः वदति - "आम्, धनस्य तु व्ययः करणीयः भविष्यति एव।"



भिक्षुलालः किञ्चित् कृपणः आसीत्। परन्तु नारिकेलं खादितुं मनसि लालसा अपि आसीत्।

सः लाभिकाम् उक्तवान् – "अस्तु, अहं विपणिं गत्वा आगमिष्यामि"।

भिक्षुलालः विपणिं प्रति प्रस्थितः।

विपणौ जनाः स्वकार्ये संलग्नाः आसन्।

भिक्षुलालः पश्यन् पृच्छन् च नारिकेल-विक्रेतुः समीपं प्राप्तवान्।

"भोः नारिकेल-विक्रेतः! नारिकेलस्य मूल्यं किम् ?" इति पृच्छति।

नारिकेलविक्रेता वदति – "केवलं, रूप्यक-द्वयम् एव तात !"

भिक्षुलालः नेत्रं विस्तार्य उक्तवान् – "रूप्यकद्वयम्! इदं मूल्यम् अत्यधिकम् अस्ति, एकेन रूप्यकेण ददातु"।



नारिकेल-विक्रेता वदति – "नैव नैव भोः!"

भिक्षुलालः प्रलपन् वदति – "तर्हि वदतु एकेन रूप्यकेण कुत्र प्राप्नोमि?"

तदा नारिकेल-विक्रेता वदति – "इतः किञ्चित् दूरे एकः महाहट्टः अस्ति, प्रायः तत्र स्यात्।"

भिक्षुलालः महाहट्टं गच्छति। महाहट्टे जनानाम् उच्च-ध्वनिः गुञ्जति स्म।

भिक्षुलालः ललाटस्य स्वेदस्य प्रोञ्छनं कृत्वा इतस्ततः पश्यति।

अनन्तरं नारिकेल-विक्रेतारं पृच्छति – "अयि भोः! एकस्य नारिकेलस्य किं मूल्यम्?"

"केवलम् एकं रूप्यकं तात!" इति नारिकेल-विक्रेता वदति।

भिक्षुलालः वदति – "अहम् अतीव दूरात् आगतः अस्मि, अतः पञ्चाशत् पणांशाः पर्याप्ताः।"



नारिकेल-विक्रेता स्पष्टरूपेण निराकृत्य वदति – "नौकाघट्टं गच्छतु, प्रायः तत्र भवान् पञ्चाशत्-पणांशैः प्राप्स्यति।"

भिक्षुलालः ततः चलितुम् आरब्धवान्। सागरस्य तीरे कश्चित् नाविकः उपविष्टः आसीत्।

"अयि भोः ! एकस्य नारिकेलस्य किं मूल्यम् ?" इति भिक्षुलालः पृष्टवान्।

नाविकः उक्तवान् – "केवलं पञ्चाशत् पणांशाः एव तात!"। तदा भिक्षुलालः वदति – "अतीव दूरात् पद्भ्याम् आगतः अस्मि, तथापि भवान् पञ्चाशत् पणांशाः इति वदति, अहं भवते पञ्चविंशति-पणांशान् ददामि।"



भिक्षुलालः नत्वा नारिकेलं स्वीकर्तुम् उद्युक्तः आसीत्, तदा नाविकः वदति "नारिकेलम् अधः स्थापयतु" इति। पुनः सः भिक्षुलालं दृष्ट्वा उक्तवान्, "अल्पमूल्येन इच्छति वा ? तर्हि नारिकेलस्य उद्यानं गच्छतु।"

भिक्षुलालः नारिकेलस्य उद्यानं प्राप्नोति, एवं च उद्यान-पालकं नारिकेलस्य मूल्यं पृच्छति।

उद्यानपालकः वदति – "एकस्य पञ्चविंशतिः पणांशाः।"

"किं पञ्चविंशतिः पणांशाः ? निरन्तरं चलनेन मम पादरक्षा क्षुण्णा जाता, अहम् अपि श्रान्तः जातः । पुनश्च धनम् अपि दातव्यं भविष्यति ? नारिकेलं निःशुल्कम् एव ददातु भोः !" इति भिक्षुलालः वदति ।

तदा उद्यान-पालकः वदति – "एषः नारिकेल-वृक्षः, अत्र सन्ति नारिकेलफलानि, यावत् इच्छति तावत् स्वीकरोतु ।"

भिक्षुलालः आनन्देन उत्फुल्लितः, सः झटिति वृक्षम् आरूढवान् ।

सः बृहत् नारिकेलं त्रोटयितुं हस्तद्वयम् अपि अग्रे प्रसारयति । अहो ! पादः स्खलितः । भिक्षुलालः अकस्मात् नारिकेलं गृहीतवान् । तस्य पादद्वयम् आकाशे लम्बमानं जातम् ।



सः सहायतायै क्रन्दनं करोति अधः स्थितम् उद्यान-पालकं च प्रार्थयति-"भोः ! भोः ! सहायतां करोतु" इति । उद्यान-पालकः वदति – तत् मम कार्यं नास्ति तात ! एतत् भवतः नारिकेलस्य च मध्ये विद्यमानः विषयः अस्ति । धनं नास्ति, क्रयणं नास्ति, विक्रयणं नास्ति एवं च सहायता अपि नास्ति । सर्वं निःशुल्कम् एव ।

तस्मिन् एव काले कश्चन उष्ट्रारोही तेन मार्गेण गच्छन् आसीत् । भिक्षुलालः उच्चैः तम् आहूतवान्, "अयि भोः उष्ट्रारोहिन् ! कृपया मम पादं वृक्षेण सह संयोजयतु ।"

उष्ट्रारोही उष्ट्रस्य उपरि स्थित्वा भिक्षुलालस्य पादं गृहीतवान् । तस्मिन् एव समये उष्ट्रः हरितं पर्णं पश्यति । पर्णं खादितुं सः स्वस्थानात् किञ्चित् विचलितः भवति ।

तदा एव सः उष्ट्रारोही उष्ट्रस्य पृष्ठात् स्खलितः । स्वस्य रक्षणाय सः भिक्षुलालस्य पादं दृढं गृहीतवान् । इदानीं जनद्वयं किं कर्तुं शक्नुयात् ! तावता कश्चन अश्वारोही तत्र आगतः ।

तं दृष्ट्वा भिक्षुलालः प्रार्थितवान्, "अयि भोः ! मम पादं वृक्षेण सह संयोजयतु ।"

"हम्म् ।" अश्वारोही अश्वस्य पृष्ठे स्थितवान् । हरितं घासं दृष्ट्वा अश्वः अपि किञ्चित् अग्रे गतः ।

एकः, द्वौ, त्रयः ! त्रयः अपि इदानीं वृक्षे लम्बमानाः सन्ति ।





स्वेद-युक्तः अश्वारोही भिक्षुलालं वदति – "भोः तात ! कृपया नारिकेलं दृढं गृह्णातु, अहं भवते शतं रूप्यकाणि दास्यामि ।"

तदा एव उष्ट्रारोही अपि वदति – "अहं भवते द्विशतं रूप्यकाणि दास्यामि ।"

"आहत्य त्रिशतं रूप्यकाणि! एतावत् धनम् !" इति चिन्तनेन भिक्षुलालस्य शिरोभ्रमणं जातम्, एवं च सः प्रसन्नतया हस्तद्वयम् अपि प्रसारयति नारिकेलं च त्यजति ।

तदा त्रयः अपि भूमौ पतन्ति, "धडाम्" इति ध्वनिः आगतः ।

भिक्षुलालः स्वस्य रक्षणं कुर्वन् एव आसीत्, तावता उपरितः एकं बृहत् नारिकेलं तस्य शिरसि पतितम् । सर्वं निःशुल्कम् एव ।

-

-

ममता पण्ड्या

अनुवादः – गानमूर्तिः खगेन्द्र-दहालः च

स्रोतः – रिमझिम, कक्षा -४, रा.शै.अ.प्र.प.

■ वार्तालापाय -

प्रश्नः१. कथायां भिक्षुलालः कृपणः अस्ति इति कथितम् । किं सः कृपणः आसीत् ? यदि आम्, तर्हि कथम् ?

प्रश्नः२. किं भवन्तः/भवत्यः भिक्षुलालस्य सदृशं कमपि जनं जानन्ति ? यदि जानन्ति तर्हि तेषां विषये वदन्तु ।

प्रश्नः ३. अधः प्रदत्तानां वस्तूनां क्रयण-समये भवन्तः/भवत्यः केषु विषयेषु अवधानं कुर्वन्ति?

किमर्थं च कुर्वन्ति ?

(क) औषधम् (ख) द्विदलम् (ग) गोधूमः (घ) शाकम्

■ पठित्वा वदन्तु -

कथायाः आधारेण सत्यं चेत् आम् (✓) असत्यं चेत् न (×) इति चिह्नं योजयन्तु –

१. भिक्षुलालः नारिकेलं खादितुम् इच्छति स्म ।

२. भिक्षुलालः अधिकः कृपणः आसीत् ।

३. महाहट्टे नारिकेलस्य मूल्यं रूप्यकत्रयम् आसीत् ।

४. उद्यान-पालकः भिक्षुलालस्य सहायतां कृतवान् ।

५. वृक्षे नारिकेलं गृहीत्वा त्रयः जनाः लम्बमानाः आसन् ।

शिक्षक-निर्देशः – सहभागिभिः सह कृपणतायाः विषये एवं च विचारपूर्वकं धन-व्ययस्य च विषये चर्चां कुर्वन्तु । कदाचित् आपणेषु वस्तूनां विक्रयणम् अल्प-मूल्येन भवति तत्र वस्तूनां मूल्ये अपकर्षः भवति । किम् अपकर्षेण सह प्राप्तानि अल्प-मूल्यानि वस्तूनि उपयोगाय योग्यानि भवन्ति ? एतस्मिन् विषये स्वीयम् अनुभवं कथयितुं सहभागिनं प्रेरयन्तु ।

■ पठित्वा वदन्तु लिखन्तु च -

प्रश्नः१. नारिकेलं यावता उद्यानात् विपणि-पर्यन्तं प्राप्नोति तावता तस्य मूल्यं वर्धितं भवति। एवं किमर्थं भवति ?

_____

_____

_____

प्रश्नः२. कस्यचित् वस्तुनः क्रयणं विक्रयणं वा यदा कुर्वन्ति तदा भवन्तः/भवत्यः कां समस्याम् अनुभवन्ति ?

_____

_____

_____

प्रश्नः३. भवतां/भवतीनां समीपे विद्यमानायां विपणौ भवन्तः/भवत्यः कानि वस्तूनि क्रेतुं शक्नुवन्ति, कानि वस्तूनि च क्रेतुं न शक्नुवन्ति ? कारण-सहितं लिखन्तु –

कानि वस्तूनि क्रेतुं शक्नुवन्ति	कानि वस्तूनि क्रेतुं न शक्नुवन्ति	कारणम्

प्रश्नः४. भिक्षुलालः आनन्देन उत्फुल्लितः आसीत् । भवतां/भवतीनां जीवने आनन्दस्य क्षणाः के भवन्ति ? वदन्तु लिखन्तु च –

_____

_____

_____

प्रश्नः ५. स्वस्य चिन्तनस्य आधारेण वाक्यानि पूरयन्तु –

(क) तस्मिन् एव काले _____ उष्ट्रारोही तेन मार्गेण गच्छन् आसीत् ।

(ख) भिक्षुलालस्य पादद्वयम् आकाशे _____ जातम् ।

(ग) तस्मिन् एव समये उष्ट्रः _____ पर्णं दृष्टवान् ।

(घ) तदा _____ अपि भूमौ पतितवन्तः ।

प्रश्नः ६. एतस्यां कथायां सङ्ख्यानां शब्द-रूपेण प्रयोगः कुत्र कुत्र कृतः ? ताः सङ्ख्याः अङ्क-रूपेण लिखन्तु –


यथा —

एकं नारिकेलम्	=	१ नारिकेलम्
पञ्चाशत् पणांशाः	=	५० पणांशाः
_____	=	_____
_____	=	_____
_____	=	_____

शिक्षक-निर्देशः— सहभागिभिः सह महार्घतायाः विषये चर्चां कुर्वन्तु । गत-समये कानि कानि वस्तूनि महार्घाणि जातानि ? तादृशानि कानि वस्तूनि सन्ति यानि महार्घाणि भविष्यन्ति चेत् अपि भवतां कापि हानिः न भविष्यति? एम्.आर्.पी, रिटेल्. होलसेल्, इत्यादीनां विषये अपि चर्चां कुर्वन्तु ।

■ राधिकया निर्मितानि चित्राणि -

राधिका चित्राणि निर्माति। तस्याः चित्राणि विद्यालयस्य भित्तौ लेपितानि सन्ति। सा त्रिकोणं( ), वर्गम् ( ), आयतं ( ) वृत्तं ( ) च उपयुज्य विविधानि चित्राणि रचयति।



राधिकायाः सखी भावना गणयित्वा ज्ञातुम् इच्छति यत् राधिका कति त्रिकोणान्, कति वर्गान्, कति आयतानि, कति वृत्तानि च उपयुज्य एतानि चित्राणि निर्मितवती इति। भवन्तः/भवत्यः अपि तस्याः सहायतां कुर्वन्तु।

आहत्य त्रिकोणाः ( )

आहत्य वर्गाः ( )

आहत्य आयतानि ( )

आहत्य वृत्तानि ( )

शिक्षक-निर्देशः — वयं प्रतिदिनं विभिन्नासु आकृतिषु विभिन्नानि वस्तूनि पश्यामः। तैः वस्तुभिः आकृतीनाम् अवगमनार्थं सहभागिनां सहायतां करोतु।


■ भवन्तः/भवत्यः अपि त्रिकोणस्य, वर्गस्य, आयतस्य, वृत्तस्य उपयोगेन चित्राणां निर्माणं कुर्वन्तु ।


■ भवतां/भवतीनां परिवेशे विद्यमानानि वस्तूनि पश्यन्तु लिखन्तु च ।

वृत्तम्		द्विचक्रिकायाः चक्रम्			
आयतम्		द्वारम्			
त्रिकोणः		सम्पावः			
वर्गः		करवस्त्रम्			

■ प्रारूपम् अनुक्रमः च -

विचित्रा मेलायां विभिन्नप्रकारैः विन्यासैः निर्मितानां ध्वजानां तोरणानि दृष्टवती । विचित्रा स्वस्य कृते केषाञ्चन ध्वजानां निर्माणं कुर्वती अस्ति । किं भवन्तः/भवत्यः ध्वजनिर्माणे विचित्रायाः साहाय्यं कर्तुं शक्नुवन्ति ?







विचित्रा कौमुद्यां कतिचन वस्त्रकटान् क्रीतवती । एतेषां वस्त्रकटानां कोणेषु भवन्तः/भवत्यः काः काः आकृतीः पश्यन्ति ? तासां चित्राणि रचयन्तु –




ऋजु-रेखया निर्मीयमाणाः आकृतयः -



गोलाकृतयः –



कस्मिंश्चित् अनुक्रमे किमर्थं केषाञ्चन प्रारूपाणाम् अनुवर्तनं पुनः पुनः भवति ? विचित्रा ध्वजानां निर्माणं कृत्वा उपवेष्टुम् आसनस्य निर्माणम् आरब्धवती । किं भवन्तः/भवत्यः आसनस्य निर्माणे विचित्रायाः सहायतां कर्तुं शक्नुवन्ति ?



■ कति कोणाः सन्ति ?

३	६	९	.....

■ रिक्तस्थाने काः सङ्ख्याः भविष्यन्ति ?

२	४	६	८			
३	६	९	१२			
३	७	११	१५			
१०	२०	३०	४०			

शिक्षक-निर्देशः— सहभागिभिः सह चर्चां कुर्वन्तु यत् आकृतीनां निर्माणं ऋजुरेखया, गोलाकारेण अथवा उभयोः मिश्रणेन भवति इति । अनुक्रमे कासाञ्चन आकृतीनां पुनरावृत्तिः भवति ।

■ मिलित्वा पठामः -

जलवाहिनी

[एतद् गीतं भोजपुरीभाषायाः लोकगीतस्य अनुवादः अस्ति। एतस्मिन् लोकगीते जलम् आनयन्त्याः महिलायाः वर्णनम् अस्ति । सा कूपात् जलम् उद्धृत्य घटे पूरयित्वा आनयति । जलस्य आनयन-समये तस्याः मनसि उत्पन्नानां भावानां वर्णनम् अत्र अस्ति]



भरिष्याम्याहरिष्यामि च सलिलकुम्भं कियत्कालम्। भरिष्या ...

शनैर्यदि यामि चिररात्राय विलपिष्यति गृहे बालः ।
द्रुतं यदि यामि वसनं मे भवेदार्द्रं सलिलवेगैः ॥ भरिष्या....

इमान् नूपुररवान् रुनझुन-मयान् आकर्ण्य नागरिकाः ।
सुखं शय्यामधिशयाना झटिति ते जागरिष्यन्ति ॥ भरिष्या.....

तनुः कूपो महलम्ब-स्तले तस्यास्ति पानीयम् ।
कृषन्त्या मे घटं रज्ज्वा करेऽप्यास्ते महास्फोटः ॥ भरिष्या....

स्रोतः – एन.सी.ई.आर.टी, रुचिरा - अष्टमी-कक्षा (८), सप्तमः पाठः (७)

विशेष-पदानाम् अर्थान् जानीमः

१. भरिष्यामि – पूरयिष्यामि, २. आहरिष्यामि – आनयामि, ३. कुम्भम् – घटम्, ४. सलिलम् – जलम् , ५. वसनम् - वस्त्रम्, ६. शनैः - मन्दम्, ७. द्रुतम् - शीघ्रम्, ८. यामि - गच्छामि, ९. विलपिष्यति – रोदनं करिष्यति, १०. नूपुरवान् – नूपुरस्य ध्वनिम्, ११. आकर्ण्य - श्रुत्वा, १२. तनुः - अल्पम् ।

मम शब्दाः

शिक्षक-निर्देशः— मनोरञ्जनम् इति विषये वार्तालापं कुर्वन्तु । सहभागिनं पृष्ट्वा एतेन सम्बद्धानि कानिचन पदानि लिखन्तु । सहभागिभिः सह मिलित्वा गीतम्, भजनम्, लोकगीतं च गायन्तु ।

■ वार्तालापाय -


१. भवतां/भवतीनां प्रदेशे जनाः लोकगीतानि कदा गायन्ति ?

२. किं भवन्तः/भवत्यः किमपि लोकगीतं जानन्ति? जानन्ति चेत् गायन्तु।

■ मिलित्वा पठन्तु वार्तालापं च कुर्वन्तु -

मायावी नेयदीपः

सम्पूर्ण-संसारे चलच्चित्रं व्याप्तम् अस्ति। चलच्चित्रस्य स्वस्य पृथक् एव संसारः वर्तते। होरा-त्रयस्य दृश्ये सहस्रशः जनाः ऐक्य-भावेन भवन्ति। जातित्वं, द्ररिद्रत्वं, धनिकत्वं च इत्यादि-भेदभावं विना सर्वे मिलित्वा हसन्ति, रुदन्ति, प्रसन्नाः



भवन्ति, आनन्दम् अनुभवन्ति विचारयन्ति च। भारत-सदृशे विशाले देशे देशस्य समाजस्य च एकता-निमित्तं चलच्चित्र-गृहस्य महती भूमिका अस्ति। हिन्दी-भाषायाः चलच्चित्राणि न केवलं हिन्दी-भाषा-क्षेत्रे प्रोत्साहनं प्राप्नुवन्ति अपितु दक्षिण-भारते अपि अत्यन्तं प्रोत्साहनं प्राप्नुवन्ति। हिन्दी-चलच्चित्रेषु दक्षिण-भारतस्य भाषाणां चलच्चित्राणां सङ्गीतं, रागाः अपि प्रसिद्धाः जायमानाः सन्ति। चलच्चित्रं 'सिनेमा' इत्यपि कथ्यते। चलच्चित्रं 'मायावी नेयदीपः' इत्यपि कथ्यते। अग्रिम-शत-वर्षेषु अस्य दीपस्य ज्वाला इतोऽपि वर्धिता भवतु इति कामनां कुर्मः।

— प्रेम-रञ्जन-अनिमेषः

टिप्पणी

१२ वित्तीय-साक्षरता

वयं ज्ञास्यामः

- वित्तकोषे लेखायाः उद्घाटन-सम्बद्ध-विषयाणाम् उपयोगम्।
- वित्तकोष-सम्बद्धानां प्रपत्राणां पठनम्, अवगमनं पूरणं च।

मम लेखा मम प्रतिष्ठा

अमृता स्वस्य मृद्-धन-पात्रम् (गुल्लक) त्रोटितवती। तस्मिन् मृद्-धनपात्रे अनेकानि धनपत्राणि नाणकानि च आसन्। छन्-छन् इति ध्वनिं कुर्वन्ति नाणकानि अधः पतितानि। अमृता तेषां गणनां कृतवती। आहत्य २५७३ रूप्यकाणि आसन्। एतत् धनं सा अतीव यत्नेन सङ्गृहीतवती। अधुना अस्य धनस्य संरक्षणस्य विषये चिन्तनीयम्। अमृता लीलावती लक्ष्मीः च घनिष्ठसख्यः सन्ति। धनसंरक्षणस्य परामर्शार्थं सा लीलावत्याः लक्ष्म्याः च समीपं गतवती। लीलावती वित्तकोषे पत्रालये वा सञ्चयनं कर्तुं परामर्शं दत्तवती। अमृता कुपिता जाता – "अहं बहुवारं वित्तकोषं गतवती, परन्तु किमपि प्रयोजनं न अभवत्।" लक्ष्मीः उक्तवती – "अधुना तादृशी स्थितिः नास्ति।" तासां मध्ये महान् विवादः जातः।

अन्ततः अमृता वित्तकोषे धनसञ्चयार्थम् अङ्गीकृतवती। सर्वाः सख्यः वित्तकोषं गतवत्यः। तत्र एकं फलकम् आसीत्। फलकं पठित्वा तिस्रः अपि स्मितहासं कृतवत्यः। तत्र अन्यविवरणानि अपि प्राप्तानि। यथा जन-धन-योजनानुसारं लेखायाः उद्घाटनं भवति इति। प्रारम्भिकराशिं विना अपि लेखायाः उद्घाटनं कर्तुं शक्यते। तेन साकं ऋणस्य प्राप्तिः अपि भवितुम् अर्हति। दुर्घटना-सुरक्षा-निधिः अपि प्राप्यते। एवञ्च तदा तदा सर्वकारेण दीयमानाः आर्थिक-सहायताः अपि साक्षात् वित्तकोषस्य लेखायां प्राप्यन्ते इति।

ताः आश्चर्यचकिताः प्रसन्नाः च जाताः । ताः जानन्ति यत् वित्तकोषे तासां धनं सुरक्षितं भविष्यति इति । वित्तकोषे सञ्चितनिधिं प्रति वृद्धिनिधिः अपि प्राप्यते । एतावन्तः लाभाः वा ! अद्भुतम् !

तर्हि कुतः लीलावती अमृता लक्ष्मीः च लेखाम् न उद्घाटयिष्यन्ति ! लीलावती अमृता लक्ष्मीः च सञ्चयलेखाम् उद्घाटयितुम् एकं प्रपत्रं पूरयित्वा समर्पितवत्यः । अमृता मतदातृ-परिचय-पत्रस्य आधार-पत्रस्य च प्रतिलिपिं योजितवती । तत्र तस्याः निवासस्थानस्य सम्पूर्णविवरणम् आसीत् । लीलावत्याः रूपे-पत्रं (RuPay Card) लुप्तं जातम् । सा ग्रामप्रधान-द्वारा पत्रं लेखयित्वा समर्पितवती ।

केषुचित् दिनेषु पत्रवाहकः तासां गृहम् आगत्य डेबिट्/रूपे-विपत्रं (स्वचालितधनयन्त्र-पत्रम् / ए.टी.एम्. कार्ड्) प्रदत्तवान् । रूपे-पत्र-द्वारा कस्यचित् अपि वित्तकोषस्य स्वचालितधनयन्त्रात् (ए.टी.एम्-तः) स्वस्य धनं निष्कासयितुं शक्यते ।

रूपे-पत्रं प्राप्य ताः अतीव सन्तुष्टाः जाताः । लीलावती उक्तवती – "अस्माकं तु प्रतिष्ठा वर्धिता । वयम् अपि लेखायुक्ताः जाताः ।"

"मम लेखा मम प्रतिष्ठा ।"

—निशात फारूक

- **वित्तकोषे लेखाम् उद्घाटयतु ।**
- **कुसीदकात् मुक्तिं प्राप्नोतु ।**
- **लेखायाः उद्घाटनम् अतीव सरलम् । लघु प्रपत्रं पूरणीयम् ।**
- **प्रपत्रेण साकं किमपि परिचय-पत्रं योजनीयम् ।**
- **यदि पूर्वम् एव लेखा उद्घाटिता अस्ति तर्हि जन-धन-योजनायां योजयितुं शक्यते ।**

■ पाठस्य आधारेण वचनानि मेलयित्वा वाक्यनिर्माणं कुर्वन्तु ।

१. वित्तकोषे लेखायाः उद्धाटनं	क. परिचय-पत्रस्य प्रतिलिपिः समर्पणीया
२. वित्तकोषे धनं	ख. लेखायाः उद्धाटनं कर्तुं शक्यते
३. प्रारम्भिक-राशिं विना	ग. डेबिट्-रूपे-पत्रं प्रदत्तवान्
४. पत्रवाहकः गृहम् आगत्य	घ. सरलम् अभवत्
५. आवेदन-प्रपत्रेण साकं	ङ. सुरक्षितं भवति

■ पठन्तु चर्चां कृत्वा लिखन्तु च ।

प्रश्नः १. लीलावती धनस्य सञ्चयार्थं अमृतायै कीदृशं परामर्शं दत्तवती ?

प्रश्नः २. वित्तकोषे भवतः / भवत्याः सञ्चयलेखा अस्ति वा ? स्वस्य वित्तकोषस्य नाम लिखतु ।

प्रश्नः ३. भवान्/भवती वित्तकोषे पत्रालये वा धनसञ्चयार्थम् अथवा निष्कासनार्थं काम् अपि समस्याम् अनुभूतवान्/अनुभूतवती वा ?

■ अधः प्रदत्तम् आवेदन-प्रपत्रं पूरयन्तु ।

नाम .....

आयुः .....

लिङ्गम् .....


पत्र-सङ्केतः .....

.....

वार्षिक-आयः .....

चल-दूरवाणी-सङ्ख्या .....

■ पश्यन्तु, पठन्तु चर्चां च कुर्वन्तु ।



जमापर्ची PAY-IN-SLIP — नकद/अंतरण CASH/TRANSFER

भारतीय स्टेट बैंक STATE BANK OF INDIA

शाखा/Branch .....

दिनांक/Date .....20.....

खाते का प्रकार : बचत बैंक/चालू खाता/आवर्ती जमा/कैश क्रेडिट/सावधि ऋण

TYPE OF ACCOUNT : SB/CA/RD/CC/TL

खाता सं./A/c No.

For the credit of the Bank Account of .....

..... के खाते में जमा कराने हेतु

नकद/चेकों के विवरण (पर्ची के दूसरी ओर) Details of Cash/Cheques (Overleaf) — ₹ पै. P.

खाते में नकद जमा/Cash Deposit in the A/c

नकदी रखरखाव शुल्क/Cash handling Chrg.

कुल जमा/Total Deposit

रुपये (शब्दों में)/Rupees (in words) .....

कार्यालय उपयोग हेतु/For Office Use

एसडब्ल्यूओ/SWO | रोकड़ अधिकारी/पासकर्ता अधिकारी Cash Officer/Passing Officer

CC.NO.100999131 CSD.FBD.:9801/06.03.2013/1Lac Pads/Samira

जमापर्ची PAY-IN-SLIP — भारतीय स्टेट बैंक / STATE BANK OF INDIA — शाखा / Branch — नकद/अंतरण CASH/TRANSFER

नोट : कृपया नकद, चैक, ड्राफ्ट आदि जमा करने के लिए अलग-अलग पर्चियों का उपयोग करें/ Please use separate slips for depositing cash, cheque, drafts etc.

दिनांक/Date .....20.....

खाते का प्रकार / Type of Account (✓) — बचत बैंक /SB | चालू खाता / CA | आवर्ती जमा /RD | कैश क्रेडिट / CC | सावधि ऋण / TL — खाता सं./Account No.

के खाते में जमा करने हेतु / For the credit of the Bank Account of .....

नोट : कृपया नकद/चेक की विवरण दूसरी ओर लिखें / NOTE : Please furnish details of cash/cheque overleaf

₹ पै./P.

खाते में नकद जमा / Cash Deposit in the Account

'पी' खण्ड के ग्राहकों को छोड़कर नकद रखरखाव शुल्क (कैश क्रेडिट/चालू खाता)/Cash Handling Chrg. (CC/CA) other than 'P' Segment Cust.

कुल जमा रूपए (शब्दों में) / Total Deposit (in words) ₹ .....

मोबाइल/ टेलीफोन नं. / Mobile/Telephone No. — पैन नं. / PAN No.


शाखा/Branch — कोड नं./Code No

(यदि जमा राशि-मूल इतर (नॉन-होम) शाखा में जमा की जानी है)/(If Deposit is made for Non Home Branch) — जमाकर्ता के हस्ताक्षर / Signature of the Depositor

कार्यालय उपयोग हेतु / For Office Use

एसडब्ल्यूओ/ SWO | रोकड़ अधिकारी/पासकर्ता अधिकारी / Cash Officer/Passing Officer

धन-सङ्ग्रहणार्थं प्रपत्रम्



खाताधारक का (के) नाम / Name of the Account Holder(s).....

भारतीय स्टेट बैंक STATE BANK OF INDIA ..... शाखा / BRANCH

बचत बैंक आहरण फार्म SAVINGS BANK WITHDRAWAL FORM

दिनांक Date .....

नोट : यह फार्म चेक नहीं है। इस फार्म के साथ पासबुक प्रस्तुत नहीं किए जाने पर भुगतान के लिए इनकार किया जाएगा। यह भुगतान केवल मूल (होम) शाखा में ही किया जाएगा।

NOTE : This form is not a Cheque. Payment will be refused if the pass book is not produced with this form. This payment will be made only at the Home Branch.

खाता संख्या ACCOUNT NUMBER

कृपया मुझे / हमें Please pay self/ourselves ₹..... (₹ .....

..... मात्र/ only)

का भुगतान करें और मेरे /हमारे उपर्युक्त बचत/बैंक खाते को यह राशि नामे करें।/ and debit the amount to my/our above savings bank account.

फोन/मोबाइल नं./Phone/Mobile No.

खाताधारक (कों) के हस्ताक्षर Signature(s) of the Account Holder(s)

कार्यालय उपयोग हेतु/FOR OFFICE USE

पासकर्ता/Passed by | हस्ताक्षर/Signature | पासकर्ता/Passed by | हस्ताक्षर/Signature


एसडब्ल्यूओ/SWO | पासकर्ता अधिकारी/PASSING OFFICER

CC No. 100101080 CSD.FBD.:875/07.10.13/50,000 Pads/Samira


धन-निष्कासनार्थं प्रपत्रम्



स्वचालित-धन-यन्त्र-पत्रम्
(ए.टी.एम्. कार्ड्)



लेखापुस्तिका



धनादेशः (चेक्)




२० रूप्यकस्य धनपत्रम्




स्वचालित-धन-यन्त्रम् (ए.टी.एम्.)

- **वित्तकोषात् स्वयं धनं निष्कासयितुम् अथवा अन्यस्मै धनं दातुं धनादेशस्य उपयोगः कर्तुं शक्यते। चित्रं दृष्ट्वा धनादेश-पूरणस्य अभ्यासं कुर्वन्तु।**




- **वित्तकोषे लेखायां धनं समर्पयितुं सङ्ग्रहणप्रपत्रं पूरणीयं भवति। चित्रं दृष्ट्वा सङ्ग्रहणप्रपत्रस्य विषये जानन्तु।**




- यथा वित्तकोषे लेखायां धनं सञ्चेतुं प्रपत्रं पूरणीयं भवति तथैव वित्तकोषे धनस्य निष्कासनार्थम् अपि एकं प्रपत्रं पूरणीयं भवति। चित्रं दृष्ट्वा निष्कासनप्रपत्रस्य विषये जानन्तु।

धन-निष्कासन-प्रपत्रम्




- रविः मालिन्यै धनादेश-द्वारा ७३०० रूप्यकाणि दातुम् इच्छति। धनादेशं पूरयितुं रवेः सहायतां कुर्वन्तु।



- उमेशः वित्तकोषे १७०० रूप्यकाणि सञ्चेतुम् इच्छति। धन-सङ्ग्रहणप्रपत्रं पूरयितुम् उमेशस्य सहायतां कुर्वन्तु।

धन-सङ्ग्रहण-प्रपत्रम्



जमापर्ची PAY-IN-SLIP — नकद/अंतरण CASH/TRANSFER

भारतीय स्टेट बैंक STATE BANK OF INDIA

..... शाखा/Branch

दिनांक/Date .....20.....

खाते का प्रकार : बचत बैंक/चालू खाता/आवर्ती जमा/कैश क्रेडिट/सावधि ऋण

TYPE OF ACCOUNT : SB/CA/RD/CC/TL

खाता सं./A/c No.

For the credit of the Bank Account of .....

..... के खाते में जमा कराने हेतु

नकद/चेकों के विवरण (पर्ची के दूसरी ओर) Details of Cash/Cheques (Overleaf)	₹	पै. P.
खाते में नकद जमा/Cash Deposit in the A/c		
नकदी रखरखाव शुल्क/Cash handling Chrg.		
कुल जमा/Total Deposit		
रूपये (शब्दों में)/Rupees (in words)		

कार्यालय उपयोग हेतु/For Office Use

एसडब्ल्यूओ/SWO	रोकड़ अधिकारी/पासकर्ता अधिकारी/ Cash Officer/Passing Officer

CC.NO.100999131

CSD.FBD.: 9801/06.03.2013/Lac Pads/Samira

जमापर्ची PAY-IN-SLIP — भारतीय स्टेट बैंक / STATE BANK OF INDIA — नकद/अंतरण CASH/TRANSFER

..... शाखा / Branch

नोट : कृपया नकद, चैक, ड्राफ्ट आदि जमा करने के लिए अलग-अलग पर्चियों का उपयोग करें/ Please use separate slips for depositing cash, cheque, drafts etc.

दिनांक/Date .....20.....

खाते का प्रकार / Type of Account (✓)					खाता सं./Account No.
बचत बैंक /SB	चालू खाता / CA	आवर्ती जमा /RD	कैश क्रेडिट / CC	सावधि ऋण / TL	

के खाते में जमा करने हेतु / For the credit of the Bank Account of .....

..... नोट : कृपया नकद/चेक की विवरण दूसरी ओर लिखें / NOTE : Please furnish details of cash/cheque overleaf

	₹	पै./P.
खाते में नकद जमा / Cash Deposit in the Account	** ** ***	**
'पी' खण्ड के ग्राहकों को छोड़कर नकद रखरखाव शुल्क (कैश क्रेडिट/चालू खाता)/Cash Handling Chrg. (CC/CA) other than 'P' Segment Cust.		
कुल जमा रूपए (शब्दों में) / Total Deposit (in words) ₹		

मोबाइल/ टेलीफोन नं. / Mobile/Telephone No. — पैन नं. / PAN No.

शाखा/Branch — कोड नं./Code No

(यदि जमा राशि-मूल इतर (नॉन-होम) शाखा में जमा की जानी है)/(If Deposit is made for Non Home Branch)


जमाकर्ता के हस्ताक्षर / Signature of the Depositor

कार्यालय उपयोग हेतु / For Office Use

एसडब्ल्यूओ/SWO		रोकड़ अधिकारी/पासकर्ता अधिकारी / Cash Officer/Passing Officer	

- लीलावती वित्तकोषात् २००० रूप्यकाणि निष्कासयितुम् इच्छति। धननिष्कासनप्रपत्रं पूरयितुं लीलावत्याः सहायतां कुर्वन्तु।

धननिष्कासनप्रपत्रम्



खाताधारक का (के) नाम / Name of the Account Holder(s).....

भारतीय स्टेट बैंक STATE BANK OF INDIA

..... शाखा / BRANCH

बचत बैंक आहरण फार्म SAVINGS BANK WITHDRAWAL FORM

दिनांक Date .....

नोट : यह फार्म चेक नहीं है। इस फार्म के साथ पासबुक प्रस्तुत नहीं किए जाने पर भुगतान के लिए इनकार किया जाएगा। यह भुगतान केवल मूल (होम) शाखा में ही किया जाएगा।

NOTE : This form is not a Cheque. Payment will be refused if the pass book is not produced with this form. This payment will be made only at the Home Branch.

खाता संख्या ACCOUNT NUMBER

कृपया मुझे / हमें Please pay self/ourselves ₹..... (₹ .....

..... मात्र/ only)

का भुगतान करें और मेरे /हमारे उपर्युक्त बचत/ बैंक खाते को यह राशि नामे करें I/ and debit the amount to my/our above savings bank account.

फोन/मोबाइल नं./Phone/Mobile No.

खाताधारक (कों) के हस्ताक्षर Signature(s) of the Account Holder(s)

कार्यालय उपयोग हेतु/FOR OFFICE USE

पासकर्ता/Passed by	हस्ताक्षर/Signature	पासकर्ता/Passed by	हस्ताक्षर/Signature
एसडब्ल्यूओ/SWO		पासकर्ता अधिकारी/PASSING OFFICER	

CC.NO. 100101000

CSD.FBD.: 9801/06.03.2013/Lac Pads/Samira

■ लीलावती अमृतां वित्तकोषे लेखायाः उद्घाटनस्य लाभान् पृच्छति ।



अमृता वदति – "वित्तकोषे लेखायाः उद्घाटनस्य एते लाभाः सन्ति–

- वयम्, अस्माकं सङ्गृहीतनिधिं सुरक्षिततया वित्तकोषे सञ्चेतुं शक्नुमः ।
- वित्तकोषे सञ्चितनिधेः वृद्धिनिधिं प्राप्नुमः ।
- आवश्यकतायाः अनुसारं वित्तकोषं गत्वा अथवा स्वचालित-धन-यन्त्रात् वा वित्तकोषे सञ्चितं धनं निष्कासयितुं शक्नुमः ।
- अन्तर्जाल-द्वारा मुद्रां विना अपि विनिमयं कर्तुं शक्नुमः ।
- अन्तर्जाल-द्वारा व्यय-पत्रकं पूरयितुं शक्नुमः । रेलयानस्य चिटिका च क्रेतुं शक्नुमः ।

अमृतायाः दैनन्दिनी – वित्तकोषस्य गणना

१५ फरवरी-मासः	सञ्चितम् २०००
१८ फरवरी-मासः	निष्कासितम् ५००
	शेषः १५००
४ मार्च्-मासः	सञ्चितम् १०००
	आहत्य २५००
११ मार्च्-मासः	निष्कासितम् ६००
	शेषः १९००
१७ मार्च्-मासः	निष्कासितम् ७००
	शेषः १२००

लीलावती – कियत् धनं सञ्चितं कियत् धनं निष्कासितम् इति विवरणं कथं ज्ञायते ?

अमृता – अहं तु एकस्यां दैनन्दिन्यां विवरणं लिखामि। परन्तु अस्माभिः वित्तकोषात् लेखापुस्तिका (पासबुक) इति एका पुस्तिका प्राप्यते यत्र वित्तकोषे अस्माभिः कृतानां विनिमयानां विवरणं भवति ।

अमृतायाः लेखापुस्तिका

दिनाङ्कः	विवरणम्	सञ्चितराशिः	निष्कासितराशिः	शेषः
१५.०२.२०२३	मुद्रा	२०००		२०००
१८.०२.२०२३	मुद्रा		५००	१५००
०४.०३.२०२३	मुद्रा	१०००		२५००
११.०३.२०२३	मुद्रा		६००	१९००
१७.०३.२०२३	मुद्रा		७००	१२००

यदि अमृता अप्रिल्-मासस्य ४ दिनाङ्के सञ्चयार्थं वित्तकोषे २५०० समर्पितवती तर्हि वित्तकोषस्य लेखापुस्तिकायाम् अस्य विवरणं कुत्र भविष्यति ? अमृतायाः लेखायाम् आहत्य कियत् धनं भविष्यति ?

शिक्षक-निर्देशः— चर्चां कुर्वन्तु यत् वित्तकोषे लेखायाः उद्घाटनं सरलम् अभवत् । एतदर्थं भावचित्र-द्वयं, मतदातृ-परिचय-पत्रं आधार-पत्रं वा भावचित्रयुक्तम् अन्यत् किमपि परिचय-पत्रं वा आवश्यकम् । जन-धन-योजनायां धनं विना अपि लेखायाः उद्घाटनं कर्तुं शक्यते । एवं विविधानां धनराशीनां समर्पणस्य निष्कासनस्य च विवरणं कथं लेखापुस्तिकायां भविष्यति इति प्रश्नान् पृष्ट्वा चर्चां कुर्वन्तु ।

■ उचितशब्देन वाक्यं पूरयन्तु ।

१. _____ वा _____ वा लेखाम् उद्धाटयितुं शक्यते ।

२. स्वस्य _____ अनुसारं व्ययः करणीयः ।

३. वित्तकोषे सञ्चितधनस्य कृते _____ प्राप्यते ।

४. वित्तकोषे लेखायाः उद्धाटनार्थं _____, _____, _____ च आवश्यकम् ।

■ स्वचालित-धन-यन्त्र-पत्रस्य (ए.टी.एम्. कार्ड् इत्यस्य) सङ्क्षिप्त-विवरणम्

वित्तकोषात् धनं निष्कासयितुं वित्तकोषे धनं समर्पयितुं च एकम् वैद्युतीय-पत्रं भवति । तस्य नाम अस्ति स्वचालित-धन-यन्त्र-पत्रम् (ए.टी.एम्. कार्ड्) इति । स्वचालित-धन-यन्त्र-पत्रेण कुत्रापि कदापि स्वचालित-धन-यन्त्रात् धनं निष्कासयितुं शक्यते । एवं च वित्तकोषस्य लेखायाः सर्वविध-विवरणम् अपि ज्ञातुं शक्यते । धन-विनिमयेन सम्बन्धितानां समस्यानां निवारणार्थं केवलं वित्तकोषे एव सम्पर्कः करणीयः । स्वचालित-धन-यन्त्र-विपत्रेण धनं निष्कासयितुं स्वचालित-धन-यन्त्रस्य उपयोगः करणीयः ।





स्मरन्तु

धनादेशस्य समय-सीमा तस्मिन् लिखित-दिनाङ्कात् मासत्रय-पर्यन्तं भवति । 'क्रॉस् चेक्' लेखाधारकस्य लेखां प्रति एव दातव्यम् ।

अधः प्रदत्तानि विवरणानि कदापि कस्मैचित् अपि न दातव्यम् ।

१. सकृत्-प्रयोज्य-कूटः (ओ.टी.पी.)
२. कूटसङ्ख्या (पिन्)
३. पत्र-सत्यापन-सङ्ख्या (सी.वी.वी.)
४. लेखा-सम्बद्ध-विवरणानि
५. वैयक्तिक-विवरणानि
६. कूटपदम् (पासवर्ड्)

■ के.वै.सी. (KYC) किं भवति?

आत्मानं ग्राहकं परिचिनोतु (KYC) (Know Your Customer) कापि प्रक्रिया अस्ति । अनया प्रक्रियया वित्तकोषः कस्याश्चित् व्यक्तेः परिचयस्य पत्रसङ्केतस्य च विवरणं दृढं करोति । अधुना आधार-पत्रेण अपि के.वै.सी. प्रक्रियां कर्तुं शक्नुमः ।

के.वै.सी. (KYC) निमित्तम् अपेक्षितानि व्यवहारपत्राणि

१. स्थायि-लेखा-सङ्ख्या-पत्रम् (पेन् कार्ड्)
२. विद्युतः व्ययपत्रकम्
३. आधार-पत्रम्
४. पत्र-सङ्केतः

■ पठन्तु लिखन्तु च

अधः वित्तीयसाक्षरतया वित्तकोषेण च सम्बद्धाः केचन मुख्यविषयाः प्रदत्ताः सन्ति । एतान् पठन्तु ।

वित्तीयसाक्षरता – कः अर्थः ?

- धनस्य संरक्षणस्य व्ययस्य च मध्ये समन्वयस्य बोधः ।
- धनसंरक्षणस्य विषये जागरूकता ।

भवान् / भवती किं कर्तुं शक्नोति ?

- आयस्य, व्ययस्य, सञ्चयस्य च विवरणं लिखतु ।
- अनावश्यकः व्ययः मास्तु ।
- धनस्य सञ्चयं करोतु ।
- वित्तकोषे पत्रालये वा धनस्य सञ्चयार्थं लेखाम् उद्घाटयतु ।
- स्वस्य सञ्चितस्य धनस्य उचितस्थले सङ्ग्रहणं करोतु ।

वित्तीयसाक्षरतायाः कः लाभः ?

- भविष्यत्-काले क्रियमाणस्य व्ययस्य कृते पूर्वसिद्धता भविष्यति ।
- भवतः / भवत्याः व्ययः नियन्त्रितः भवति ।
- जागरूकतया व्ययः कर्तुं शक्यते ।
- स्वस्य आवश्यकतानाम् अवगमनं भविष्यति ।

वित्तकोषे लेखायाः उद्घाटनस्य के लाभाः भविष्यन्ति ?

- भवान् / भवती स्वस्य सञ्चितं धनं सुरक्षिततया वित्तकोषे सङ्ग्रहीतुं शक्नोति ।
- वित्तकोषे सञ्चितं धनं प्रति वृद्धिनिधिः प्राप्यते ।
- आवश्यकतायाः अनुसारं सञ्चितं धनं निष्कासयितुं शक्यते ।

अधः प्रदत्तेषु वित्तकोषे लेखाम् उद्घाटयितुं किं किम् अपेक्षितम् । तस्य पुरतः ✓ चिह्नं स्थापयतु –

- भावचित्रम्
- आधार् कार्ड्
- स्थायि-लेखा-सङ्ख्या-पत्रम् (पेन् कार्ड्)
- मतदातृ-परिचय-पत्रम्

वित्तकोषे लेखायाः उद्घाटनेन किं किं प्राप्यते ? –

- धनादेश-पुस्तिका (चेक् बुक्)
- लेखा-पुस्तिका (पासबुक)
- स्वचालित-धन-यन्त्र-पत्रम् (डेबिट् रूपे कार्ड्)

■ भीम इति तन्त्रकोषः (BHIM App)

भीम इति तन्त्रकोषः (BHIM App) धनस्य विनिमयार्थं चलदूरवाण्यां कश्चन तन्त्रकोषः भवति । एतत् 'वैद्युतीय-धनप्रदानम् (ई-पेमेण्ट्)' इत्यपि उच्यते । अनेन भवान् / भवती चलदूरवाण्या धनस्य विनिमयं कर्तुं शक्नोति ।

- दूरस्थ-व्यक्तिं प्रति धनं प्रेषयितुं शक्नुमः ।
- बालानां विद्यालयस्य शुल्कं दातुं शक्नुमः ।
- विद्युतः व्यय-पत्रकं पूरयितुं शक्नुमः ।
- आपणेषु वस्तुक्रयणार्थं धनं दातुं शक्नुमः ।
- ऋणस्य निर्यातनं कर्तुं शक्नुमः ।



एतदर्थं सर्वप्रथमं भवतः/भवत्याः चलदूरवाण्यां भीम इति तन्त्रकोषः अवतारणीयः (डौन्-लोड करणीयम्) । तदनन्तरं चलदूरवाण्यां सः तन्त्रकोषः संस्थापनीयः (इन्स्टाल् करणीयम्) । अस्मिन् २० भाषासु कार्यं कर्तुं शक्नुमः । अस्मिन् तन्त्रकोषे भवान्/भवती भारतीय-स्टेट्-बेङ्क इति वित्तकोष-सहितम् आहत्य ३० वित्तकोषाणां लेखानाम् उपयोगं कर्तुं शक्नोति ।



(*स्रोतः*— https://www.npci.org.in
https://www.npci.org.in/product-review/bhim-product-overview)

■ पठन्तु लिखन्तु च –

'वित्तीय-साक्षरता' इत्युक्ते उचितरूपेण धनस्य आय-व्ययोः नियन्त्रणं धनसञ्चयनं प्रति जागरूकता च।

■ वित्तकोषे लेखाम् उद्घाटयितुं निम्नलिखितानि आलेखानि अपेक्षितानि –

- भावचित्रम्
- आधार-पत्रम्
- मतदातृ-परिचय-पत्रम्
- स्थायि-लेखा-सङ्ख्या-पत्रम्
- विद्युतः व्ययपत्रकम्
- पत्र-सङ्केतः

■ डेबिट् कार्ड् द्वारा अनेकानि कार्याणि कर्तुं शक्नुमः। अधः केषाञ्चन कार्याणां सूची दीयते। भवान्/भवती अन्यकार्याणां नामानि लिखतु।

- आपणेषु क्रयणम्
- अन्तर्जालमाध्यमेन क्रयणम्
- चिटिकायाः आरक्षणम्
- पथिशालायाः आरक्षणम्
- अन्तर्जालमाध्यमेन धनप्रदानम्
- विद्यालयस्य शुल्कदानम्
- कस्मैचित् धनप्रेषणम्
- _____
- _____
- _____
- _____

उपर्युक्तानि विहाय भवान् / भवती स्वचालित-धन-विपत्र-द्वारा (डेबिट् कार्ड्) किं किं कर्तुं शक्नोति इति लिखतु –

शिक्षकनिर्देशः— 'वित्तीय-साक्षरता' इत्यस्मिन् विषये चर्चां कुर्मः । सहभागिनः पृष्ट्वा अनेन विषयेण सम्बद्धान् द्वित्रशब्दान् लिखामः । एते शब्दाः तेषां स्वभाषया अपि भवितुम् अर्हन्ति । यथा – 'रूप्यकाणि' इत्यस्य कृते 'रुपया' इत्यादि ।

मिलित्वा पठामः -

दानस्य गणना

कश्चन महाराजः आसीत् । सः अतीव स्वार्थी आसीत् । स्वस्य सौकर्यार्थं सः सहस्रशः धन-व्ययं करोति स्म । परन्तु प्रजायाः कृते किञ्चित् अपि न व्ययं करोति स्म ।



एकदा तस्य राज्ये दुर्भिक्षं जातम् । सर्वे अपि जनाः महाराजस्य समीपं गतवन्तः । ते उक्तवन्तः "हे महाराज ! धान्यानां क्रयणार्थं कृपया धनसहायतां करोतु ।" परन्तु सः महाराजः किञ्चित् अपि धनं न दत्तवान् । सः उक्तवान् "अद्य सर्वे दुर्भिक्षस्य कारणेन पीडिताः । श्वः भूकम्पः आगच्छेत् । यदि एवमेव सर्वेषां सहायतां करोमि तर्हि सम्पूर्णः राजकोषः रिक्तः भविष्यति । तदा किञ्चित् अपि धनम् अवशिष्टं न भविष्यति ।" एतत् श्रुत्वा सर्वे निराशाः भूत्वा ततः प्रतिगताः ।



गच्छता कालेन दुर्भिक्षस्य समस्या वर्धमाना आसीत् । सहस्रशः जनाः बुभुक्षया मृताः । जनाः सहायता-निमित्तं पुनः पुनः महाराजस्य समीपं गतवन्तः । परन्तु महाराजः भीष्मप्रतिज्ञाम् इव स्वस्य निर्णये दृढः आसीत् ।

केषाञ्चन दिनानाम् अनन्तरम् एकः संन्यासी राजसभाम् आगतवान् । सः संन्यासी उक्तवान् "हे महाराज ! अहं बहुदूरात् आगतवान् । भवतः यशः अतीव प्रसिद्धम् अस्ति । भवान् कृपया



मम इच्छापूर्तिं करोतु ।”

स्वस्य प्रशंसां श्रुत्वा महाराजः सन्तुष्टः जातः । सः उक्तवान् “हे साधो ! कृपया वदतु । भवान् किम् इच्छति ?” संन्यासी उक्तवान् “अहं विंशतिं दिनानि यावत् बहुसामान्य-भिक्षायाः याचनां कर्तुम् इच्छामि । परन्तु मम भिक्षायाः एकः नियमः अस्ति । अहं प्रथमदिने यावत् धनं स्वीकरोमि द्वितीयदिने तस्य द्विगुणितं धनं स्वीकरोमि । तृतीयदिने द्वितीयदिनस्य द्विगुणितं धनं स्वीकरोमि । चतुर्थदिने तृतीयदिनस्य द्विगुणितं धनं स्वीकरोमि । अनेन प्रकारेण प्रतिदिनं पूर्वतनदिनस्य द्विगुणितं धनं स्वीकरोमि ।”

महाराजः पृष्टवान् “भवान् प्रथमदिने कियत् धनं स्वीकरिष्यति ?”

संन्यासी उक्तवान् “केवलम् एकं रूप्यकम् ।” एतत् श्रुत्वा महाराजः सन्तुष्टः जातः । सः राजकोषात् संन्यासिनः वचनानुसारं भिक्षां दातुं आदिष्टवान् ।



पञ्चदश दिनानि व्यतीतानि । राजकोषाधिकारी विस्मितः जातः । संन्यासिनः भिक्षायां बहुधनं व्ययीकृतम् । राजकोषाधिकारी गणनां कृतवान् यत् विंशति-दिनेषु दशलक्षाधिक-अष्टचत्वारिंशत्-सहस्रोत्तर-पञ्चशताधिक-पञ्चसप्ततिः (१०४८५७५) रूप्यकाणि दातव्यानि इति ।

सः एतां गणनां महाराजं सूचितवान् । गणनां दृष्ट्वा महाराजः अपि विस्मितः जातः ।

दानस्य गणना

प्रथमं दिनम्	१ रूप्यकम्
द्वितीयं दिनम्	२ रूप्यके
तृतीयं दिनम्	४ रूप्यकाणि
चतुर्थं दिनम्	८ रूप्यकाणि
पञ्चमं दिनम्	१६ रूप्यकाणि
षष्ठं दिनम्	३२ रूप्यकाणि
सप्तमं दिनम्	६४ रूप्यकाणि
अष्टमं दिनम्	१२८ रूप्यकाणि
नवमं दिनम्	२५६ रूप्यकाणि
दशमं दिनम्	५१२ रूप्यकाणि
एकादशं दिनम्	१०२४ रूप्यकाणि
द्वादशं दिनम्	२०४८ रूप्यकाणि
त्रयोदशं दिनम्	४०९६ रूप्यकाणि
चतुर्दशं दिनम्	८१९२ रूप्यकाणि
पञ्चदशं दिनम्	१६३८४ रूप्यकाणि
षोडशं दिनम्	३२७६८ रूप्यकाणि
सप्तदशं दिनम्	६५५३६ रूप्यकाणि
अष्टादशं दिनम्	१३१०७२ रूप्यकाणि
नवदशं दिनम्	२६२१४४ रूप्यकाणि
विंशतितमं दिनम्	५२४२८८ रूप्यकाणि
आहत्य	१०४८५७५ रूप्यकाणि

सः संन्यासिनम् आहूतवान् । महाराजः संन्यासिनं भिक्षायाः धनं न्यूनं कर्तुं प्रार्थितवान् ।

संन्यासी उक्तवान् "सर्वे जनाः दुर्भिक्षेण पीडिताः सन्ति ।

तेषां सहायतां कर्तुं मह्यं केवलं पञ्चाशत् सहस्रं (५००००) रूप्यकाणि एव अपेक्षितानि ।

एषा एव मम भिक्षा भवतु ।"

महाराजः बहुयाचनां कृतवान् । सः उक्तवान् "कृपया धनं न्यूनं करोतु।"

परन्तु संन्यासी स्वस्य निर्णये दृढः आसीत् ।

अनन्यगत्या महाराजः संन्यासिने पञ्चाशत् सहस्रं (५००००) रूप्यकाणि दत्तवान् ।

सम्पूर्णे देशे वार्ता व्याप्ता यत् राजकोषात् पञ्चाशत् सहस्रं (५००००) रूप्यकाणि दुर्भिक्षस्य समस्यां निवारयितुं प्रदत्तानि इति ।

सर्वे जनाः उक्तवन्तः "अस्माकं महाराजः कर्णः इव महान् दानी अस्ति" इति ।

- सुकुमार राय

स्रोतः – रिमझिम, कक्षा – ४,
रा.शै.अ.प्र.प.

■ विचिन्त्य वदन्तु -

अधः प्रदत्तानां लोकोक्तीनाम् अर्थस्य चर्चां कुर्वन्तु -

भवितव्यानां द्वाराणि भवन्ति सर्वत्र	आर्जवं हि कुटिलेषु न नीतिः	विषकुम्भं पयोमुखम्	शरीरमाद्यं खलु धर्मसाधनम्
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः	कालस्य कुटिला गतिः	चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः	अति सर्वत्र वर्जयेत्

भवान्/भवती कस्मिन् समये कस्याः सूक्तेः प्रयोगं करोति ?

टिप्पणी

१३ अङ्कीय-साक्षरता

वयं ज्ञास्यामः

- अङ्कीय-सङ्ख्यानाम् अवगमनं लेखनं च।
- चित्रे प्रदर्शितस्य सङ्ख्यात्मक-विवरणस्य ज्ञानम्।
- नित्यजीवने चलदूरवाण्या संबद्धानां समस्यानां परिहारम्।

मार्गः सुगमः सञ्जातः

सोमनाथः जामनगरे वसति। सः कृषिकार्यं करोति।

तस्य ८.२ एकर्-परिमिता भूमिः अस्ति। तस्य त्रयः बालाः सन्ति – एकः पुत्रः पुत्रीद्वयं च। ते सर्वे विद्यालये पठन्ति। सोमनाथः षष्ठकक्ष्यां यावत् विद्यालयं गतवान्। बालाः सम्यक् अध्ययनं कुर्युः इति सः इच्छति। तेषाम् अध्ययनार्थं सः ऋणं स्वीकृत्य एकां चलदूरवाणीम् अपि क्रीतवान्। बालान् पालयितुं सोमनाथः तस्य पत्न्या सह अतीव परिश्रमं करोति। सः गते वर्षाकाले व्रीहेः कृषिं शीतकाले च गोधूमस्य कृषिं कृतवान्। सोमनाथः कृषिकार्यस्य आरम्भात् पूर्वं सम्पूर्णां



योजनां कृतवान् । यथा – बीजानां क्रयणम्, क्षेत्रनिमित्तं सारस्य सङ्ग्रहणम् इत्यादि । तेन पुनः पुनः जलसेचनार्थं जलयन्त्रं भाटकरूपेण स्वीकरणीयम् आसीत् । तदर्थं धनम् अपि अपेक्षितम् आसीत् । कार्यार्थं सः कर्मकरान् अपि नियोजयितुम् इच्छति स्म । अतः सोमनाथः आय-व्यय-योजनां कृतवान् ।



स्रोत:https://play.google.com/store/apps/details?id=in.farmguide.farmerapp.central&hl=en_IN&gl=US

किन्तु तस्मिन् तावद् धनं न आसीत् यावत् वस्तुतः अपेक्षितं भवति ।



स्रोत: https://mkisan.gov.in/

अतः पूर्वतन-वर्षस्य अवशिष्टम् अपि धनम् अत्र निवेशनीयं एवं च ग्रामीण-वित्तकोषात् ऋणं स्वीकर्तव्यम् इति सः चिन्तितवान् । किन्तु सोमनाथः एतावद् धनं निवेशयितुं न इच्छति स्म । यतो हि तेन बालानाम् अध्ययनस्य गृहसञ्चालनस्य च व्ययेन सह चलदूरवाण्यै स्वीकृतम् ऋणम् अपि निर्यातनीयम् आसीत् ।

सोमनाथः अतीव बुद्धिमान् आसीत् । सः बालानाम् अध्ययनार्थम् अपि चलदूरवाण्याः उपयोगं कृतवान् । तथा एव चलदूरवाण्याः सहायतया नूतन-कृषि-पद्धतीनां कृषि-योजनानां च विषये ज्ञातवान् । तदर्थं सः ई-चौपाल्, डिजिटल् मंडी इंडिया, एम् किसान् इत्यादीन् तन्त्रकोषान् (एप्) अपि सः चलदूरवाण्याम्



स्रोत: https://play.google.com/store/apps/details?id=com.itcinfotech.echoupal&hl=zu&gl=US

अवतारितवान् । प्रतिदिनं सायङ्काले सोमनाथः एवं च तस्य बालाः दूरभाषाम् उद्घाटयन्ति । स्थानीय-प्रशासनद्वारा याः सहायताः प्राप्यन्ते, तद्-द्वारा स्वीय-कृषिक्षेत्रे कथं प्रगतिः साधयितुं शक्यते इति ते पश्यन्ति । सोमनाथः एम् किसान् तन्त्रकोषम् (एप्) उपयोक्तुम् आरब्धवान् । तत्र वातावरणस्य स्थितिः,

बीजानां साराणां च मूल्यम्, विक्रेय-वस्तूनां मूल्यम् – इत्यादि विवरणं प्राप्यते । तेषां वस्तूनां क्रयणार्थं कियान् धनव्ययः भवति इति सः गणनां कृतवान्। सोमनाथः इदानीं गृहे स्थित्वा एव चलदूरवाणी-द्वारा सर्वम् अपि विवरणं प्राप्नोति।

वातावरणस्य अनियमिततां दृष्ट्वा सः "क्राप् इन्श्यूरेंस् मोबैल् अप्लिकेशन्" इत्यस्मिन् अपि आवेदनं कृतवान्। तेन सः अतीव न्यून-मूल्येन उत्पन्नस्य सस्यस्य सुरक्षानिधिं कारितवान् । यदि केनापि कारणेन उत्पन्नं सस्यं यदि नश्यति तर्हि अधिकाधिकं धनं प्राप्यते । अन्यैः कृषकैः सह सम्भाषणं कर्तुं एवं च नूतनान् विचारान् ज्ञातुं सः ई-चौपाल इत्यस्य अपि उपयोगं कर्तुम् आरब्धवान्। कदाचित् सः जलसेचनार्थं भाटकेन जलयन्त्रं स्वीकर्तुम् उद्युक्तः आसीत् । किन्तु सः एम् किसान् इति तन्त्रकोषेण ज्ञातवान् यत् अग्रिमसप्ताहे महती वृष्टिः भविष्यति इति। अतः सः भाटकेन जलयन्त्रं न स्वीकृतवान्, स्वविवेकन धनस्य रक्षणं च कृतवान्।

सस्यकर्तनस्य कालः यदा सन्निहितः तदा केषुचित् दिनेषु चक्रवातः आगमिष्यति इति चलदूरवाण्यां पूर्वसूचना आगता । ततः पूर्वम् एव सोमनाथः अधिकान् कर्मकरान् आनीय सस्यकर्तनं कारितवान् । अनेन तस्य वर्धितं सस्यं वृष्टेः झञ्झावातात् च रक्षितम्।

सोमनाथः स्वीयं वर्धितं सस्यं संरक्षितुम्, उत्तमं धान्यं च प्राप्तुम् समुचितान् निर्णयान् स्वीकृतवान्। एतत् सर्वं चलदूरवाण्यां विद्यमानं तन्त्रकोषम् उपयुज्य एव सः कर्तुं शक्तवान् । अन्येषां विषयज्ञानां एवं च स्थानीय-प्रशासकानां परामर्शम् अपि सः प्राप्नोति स्म।

चलदूरवाण्याः सहायतया बालाः अपि सम्यग् अध्ययनं कृतवन्तः । तथैव सोमनाथः अपि कृषिद्वारा प्रभूतं धनम् अर्जितवान्। तेन सः दूरभाषायाः ऋणम् अपि प्रत्यर्पितवान् एवं च किञ्चित् धनं बालानाम् अध्ययनाय वित्तकोषे सञ्चितवान्।

■ वार्तालापाय

प्रश्नः १. सोमनाथः वर्षाकाले केषां बीजानां वपनं कृतवान् ?

प्रश्नः २. सोमनाथः बीजानां साराणां च समुचितं मूल्यं कथं ज्ञातवान् ?

प्रश्नः ३. सोमनाथः वृष्ट्याः पूर्वं भाटकेन यत् जलयन्त्रं न स्वीकृतवान्, किं तेन तस्य हानिः सञ्जाता ?

प्रश्नः ४. सोमनाथः वातावरणस्य, क्रयणमूल्यस्य, विक्रयणमूल्यस्य च विवरणानि विषयविशेषज्ञैः कथं प्राप्नोति स्म ?


प्रश्नः ५. कृषकाः स्वीयकृषिक्षेत्रे उत्तमं सस्यं प्राप्तुं किं तन्त्रकोषद्वयम् उपयोक्तुं शक्नुवन्ति ?

■ ममशब्दाः

शिक्षक-निर्देशः— अङ्कीय-साक्षरतायाः विषये चर्चां कुर्वन्तु। सहभागिभिः सह चलदूरवाण्याः विभिन्न-प्रयोगाणां चर्चां कुर्वन्तु।

अङ्कीय-सङ्ख्याः (डिजिटल्-सङ्ख्याः)

भवान्/भवती धनं निष्कासयितुं वित्तकोषं गच्छति । वित्तकोषः भवते/भवत्यै एकां क्रमसङ्ख्यां ददाति । भवतः/भवत्याः सङ्ख्या अस्ति – द्वादश । एषा सङ्ख्या गवाक्षे स्थापिते एकस्मिन् यन्त्रे एतादृशं दृश्यते ।



रेलयानस्थानके रेलयानस्य सङ्ख्यां यानपीठिकायाः सङ्ख्यां च प्रदर्शयितुम् अपि एतादृशानाम् अङ्कानाम् एव उपयोगः क्रियते । यथा –

रेलयान-सङ्ख्या	रेलयानस्य नाम	यान-पीठिकायाः सङ्ख्या
12398	महाबोधि-एक्सप्रेस्	8
12454	राजधानी-एक्सप्रेस्	5

एतादृशाः एव अङ्काः शाकविपण्यां, तापमानं द्रष्टुं, मेट्रो-यानस्य स्थानके इत्यादिषु दृश्यफलके दृश्यन्ते । भवतः/भवत्याः गणनायन्त्रस्य दृश्यफलके अपि एतादृशाः एव अङ्काः भवन्ति ।

0 1 2 3 4 5 6 7 8 9

एतेषाम् अङ्कानां ज्ञानम् अपि अति आवश्यकम् अस्ति । यदि भवतः/भवत्याः क्रम-सङ्ख्या अस्ति १२३, तर्हि एषा सङ्ख्या दृश्यफलके कथं दृश्यते इति लिखन्तु –

शिक्षक-निर्देशः— सहभागिभ्यः अङ्कीय-सङ्ख्यानां परिचयं कारयतु । तेभ्यः अङ्कीय-सङ्ख्यां पठितुं लेखितुं च विभिन्नान् अभ्यासान् ददातु ।

किं भवान् / भवती स्वस्य धान्यानाम् उत्पादनस्य तुलनाम् अन्येषाम् उत्पादनेन सह अथवा गतवर्षस्य स्व-उत्पादनेन सह करोति ? एतादृशीं तुलनां कर्तुं चित्रं बहु उपयोगि भवति।


गोधूमस्य गीतायाः षड् गोण्यः



गोधूमस्य नर्मदायाः पञ्च गोण्यः

गीता – "अहो अत्युत्तमम् ! मम सकाशे गोधूमस्य एका गोणी अधिका अस्ति।"

चित्रं दृष्ट्वा गीता कथम् एतत् अवगतवती ?


गीता ज्ञातुम् इच्छति यत् केन दलेन सर्वकारस्य निर्माणं क्रियते ? इति। गीता दूरदर्शने निर्वाचनस्य वार्ताः पश्यन्ती अस्ति। यदा निर्वाचनस्य परिणामस्य उद्घोषणा भवति तदा दूरदर्शने कानिचन चित्राणि प्रदर्श्यन्ते। तादृशम् एकं चित्रम् अधः प्रदत्तम् अस्ति। अनेन चित्रेण सरलतया अवगन्तुं शक्यते यत् कस्य दलस्य कृते अधिकमतदानम् अभवत् इति।

चित्रं दृष्ट्वा वदन्तु



१. केन दलेन अधिकानि निर्वाचनक्षेत्राणि जितानि ?
२. केन दलेन सर्वतः न्यूनानि निर्वाचनक्षेत्राणि जितानि ?

एवम् एव वयम्, अस्मान् परितः विद्यमानान् विषयान् दृष्ट्वा बहुविधानि विवरणानि ज्ञातुं शक्नुमः । गीता स्वस्य क्षेत्रे विभिन्नानां फलवृक्षाणां रोपणं कृतवती । यथा –




चित्रं दृष्ट्वा वदन्तु –

१. क्षेत्रे कस्य फलस्य वृक्षाणां रोपणम् अधिकं कृतम् अस्ति ? _____

२. केषां वृक्षाणां रोपणं समानपरिमाणे कृतम् अस्ति ? _____

३. क्षेत्रस्य कस्मिन् भागे आम्रवृक्षाणां रोपणं कृतम् अस्ति ? _____

गीता दूरदर्शने २०-२० क्रिकेट्-क्रीडां पश्यन्ती अस्ति । अन्तिमेषु षट्सु क्षेपणषट्केषु निर्मितानां धावनाङ्कानां विवरणं चित्रे प्रदर्शितम् अस्ति । –



चित्रं दृष्ट्वा वदन्तु –

प्रश्नः१ सर्वाधिकाः धावनाङ्काः कस्मिन् क्षेपणषट्के अर्जिताः ? भवान्/भवती कथं ज्ञातवान् / ज्ञातवती ?

प्रश्नः२ कस्मिन् क्षेपणषट्के सर्वतः न्यूनाः धावनाङ्काः अर्जिताः ?

प्रश्नः३ कस्मिन् क्षेपणषट्के कोऽपि धावनाङ्कः न अर्जितः ?

प्रश्नः४ पञ्चदशे क्षेपणषट्के कति धावनाङ्काः अर्जिताः ?

क्रिकेट्-क्रीडां दृष्ट्वा गीता चलदूरवाण्याः कृते धनापूर्तिं (रिचार्ज्) कर्तुम् एकम् आपणं गतवती। तया अधः प्रदत्तेषु धनापूर्ति-विकल्पेषु एकस्य चयनं करणीयम्। अधः धनापूर्ति-विकल्पस्य मूल्यं समयसीमा च प्रदत्ता अस्ति।

धनापूर्ति-विकल्पः	१५५ रूप्यकाणि	१७९ रूप्यकाणि	४७९ रूप्यकाणि
वैधता	२४ दिनानि	२८ दिनानि	५६ दिनानि

एतेषु कः धनापूर्ति-विकल्पः गीतायाः लाभाय भवति ?

यदि गीता १७९ रूप्यकाणां धनापूर्तिं कारयितुम् आपणिकाय ५०० रूप्यकाणि ददाति, तर्हि आपणिकः गीतायै शेषं कियत् धनं प्रत्यर्पयति ?

गीता मार्च्-मासस्य १८ दिनाङ्के धनापूर्तिं कारितवती। तस्य धनापूर्ति-विकल्पस्य २८ दिनानां वैधता अस्ति। तर्हि गीता अग्रिमां धनापूर्तिं कदा करिष्यति ?

मार्च्-मासः						
रविवासरः	सोमवासरः	मङ्गलवासरः	बुधवासरः	गुरुवासरः	शुक्रवासरः	शनिवासरः
		१	२	३	४	५
६	७	८	९	१०	११	१२
१३	१४	१५	१६	१७	१८	१९
२०	२१	२२	२३	२४	२५	२६
२७	२८	२९	३०	३१		

अप्रिल्-मासः						
रविवासरः	सोमवासरः	मङ्गलवासरः	बुधवासरः	गुरुवासरः	शुक्रवासरः	शनिवासरः
					१	२
३	४	५	६	७	८	९
१०	११	१२	१३	१४	१५	१६
१७	१८	१९	२०	२१	२२	२३
२४	२५	२६	२७	२८	२९	३०

चलदूरवाण्याः लोकः

निशा जनकस्य वित्तकोषस्य लेखां चलदूरवाण्याः सङ्ख्यया संयोजितवती। सा जनकं दूरवाणी-द्वारा विद्युतः व्ययपत्रक-पूर्तिं, दूरवाण्याः धनापूर्तिं च कर्तुं शिक्षितवती । अधुना तस्याः पिता दूरवाण्या सर्वविध-व्ययपत्रकाणि पूरयति । तदर्थं यत् धनम् अपेक्षितं तत् साक्षात् तस्य वित्तकोषस्य लेखातः स्थानान्तरितं जायते । अनेन तस्याः जनकस्य कृते व्ययपत्रक-पूर्त्यर्थं विद्युद्-विभागादीनां कार्यालयं प्रति गमन-आगमन-समस्या अपहृता।

अवकाशात् परं निशा नगरं गतवती। सा नगरे पठति स्म। यदा कदा सा स्वस्य महाविद्यालस्य भावचित्राणि चलच्चित्राणि च प्रेषयति स्म । तस्याः जनकः तया प्रेषितानि सर्वाणि भावचित्राणि चलच्चित्राणि च उत्सुकतया पश्यति स्म। वाट्स्-एप् द्वारा सः स्वविचारान् सन्देशमाध्यमेन प्रेषयति स्म । अधुना जनकः पत्राणां स्थाने ई-पत्रं (ई-मेल्) प्रेषयति । अनेन पत्रप्रेषणार्थं क्रियमाणः व्ययः समयः च न्यूनः जायते।



एकदा निशा स्वजनकं प्रति दृश्याह्वानं (वीडियो-कॉल्)

कृतवती । तस्याः जनकः ताम् उक्तवान् "अद्यतनेषु अहं यू-ट्यूब् माध्यमेन लोकगीतानि श्रुत्वा एव निद्रां करोमि । अहं तु अधुना सर्वविधाः वार्तावाहिनीः यू-ट्यूब् माध्यमेन एव पश्यामि ।"

निशा उक्तवती "बहु उत्तमं तात ! भवान् तु तन्त्रनिपुणः जातः । बहु उत्तमम् । तात ! कोऽपि भवतः स्वचालित-धन-यन्त्र-सङ्ख्यां (ए.टी.एम्. सङ्ख्या) तु न पृष्टवान् खलु !"

निशायाः जनकः उक्तवान् "आम्, एकदा कश्चन पृष्टवान् । परन्तु अहं न उक्तवान् । यदि अहम् उक्तवान् स्यां तर्हि सः स्वचालित-धन-यन्त्र-पत्रस्य (ए.टी. एम् कार्ड् इत्यस्य) कूटसङ्ख्यां पृष्ट्वा मम सर्वं धनं निष्कासयेत् । अहं तु जागरूकः आसम् ।"

निशा उक्तवती "अत्युत्तमं तात ! भवान् आन्तर्जालिक-वञ्चकेभ्यः कथं सुरक्षितः भवितव्यः इति अपि ज्ञातवान् ।"

निशायाः जनकः सहर्षं निशाम् उक्तवान् "नगरे यदि कुत्रचित् गमन-आगमनं करणीयं तर्हि भाटकयानस्य अथवा बैक्-यानस्य आरक्षणं करोतु । अपेक्षितानि पुस्तकानि अपि चलदूरवाण्या क्रेतुं शक्नोति । अनेके तन्त्रकोषाः सन्ति । गूगल् इत्यत्र अन्वेषणेन तेषां विवरणानि प्राप्यन्ते । अन्तर्जालीय-पुस्तकालये अपि पुस्तकानि अन्विष्य पठितुं शक्नोति ।"

"मम जनकः तु चलदूरवाण्याः विषये अधिकानि विवरणानि ज्ञातवान्" इति चिन्तयन्ती निशा स्मितवती ।

तत्पश्चात् निशा दृश्याह्वानेन एव जनकं महाविद्यालयं प्रदर्शितवती । जनकः अपि निशां गोधूमस्य क्षेत्रं, तडागं च प्रदर्शितवान् । तडागे न्यूनम् एव जलम् आसीत् ।

निशायाः जनकः एवम् अनुभूतवान् यत् सः नगरे स्वपुत्र्याः निकटे एव अस्ति इति । निशा अपि अनुभूतवती यत् सा ग्रामस्य क्षेत्रे तडागे च अस्ति इति ।

वार्तालापाय

प्रश्नः १. निशा जनकं चलदूरवाण्या किं किं शिक्षितवती ?

प्रश्नः २. जनकः निशां चलदूरवाण्याः उपयोगस्य विषये किं किम् उक्तवान् ?

प्रश्नः ३. चलदूरवाण्या निशा-जनकयोः मध्ये दूरता कथं निकटता अपगता ? किं कदाचित् भवान् / भवती अपि चलदूरवाण्या दूरस्थेन केनचित् परिचितेन साकं निकटताम् अनुभूतवान् / अनुभूतवती ? यदि एवम् अस्ति तर्हि तम् अनुभवं सर्वान् वदन्तु ।

प्रश्नः ४. चलदूरवाण्याः आन्तर्जालिक-वञ्चकानां विषये अत्यधिकं श्रूयते । आन्तर्जालिक-वञ्चनात् सुरक्षितः भवितुं किं किं करणीयम् ?

पठतु, वदतु लिखतु च

अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखतु ।

प्रश्नः १. चलदूरवाण्याः के के लाभाः सन्ति ?

_____

_____

_____

प्रश्नः २. चलदूरवाण्याः उपयोगसमये केषु विषयेषु अवधानम् अपेक्षितम् ?

_____

_____

_____

प्रश्नः ३. चलदूरवाण्या केषां विनिमयः कर्तुं शक्यते ? समीचीनस्य उत्तरस्य पुरतः (✓) इति चिह्नं स्थापयतु।

अ. धनस्य ○

आ. सन्देशानाम् ○

इ. चित्राणाम् ○

ई. उपर्युक्तानाम् त्रयाणाम् ○

भवान्/भवती स्वस्य चलदूरवाण्याः उपयोगं किमर्थं करोति इति सूचीं करोतु।

_____ _____ _____

_____ _____ _____

_____ _____ _____

किं कदापि चलदूरवाण्या कार्यकरणे भवान्/भवती महत् सौकर्यम् अनुभूतवान्/अनुभूतवती वा ?

_____

_____

_____

_____

_____


_____

■ चलदूरवाण्याः अन्ये केचन उपयोगाः

- संक्षिप्त-सन्देश-सेवा (एस्.एम्.एस्) द्वारा सन्देशं प्रेषणम्।
- गणनायन्त्रस्य सहायतया गणना।
- जागरणार्थं प्रबोधन-घट्याः उपयोगः।
- दिनदर्शिकायाः उपयोगः।
- विभिन्नैः तन्त्रकोषैः भवान्/भवती पद्भ्यां कियत् चलितवान्/ चलितवती इत्यस्य अवलोकनम्।
- चलदूरवाण्या अध्ययनम् । (चलदूरवाण्यां केषाञ्चित् विशेषाणां तन्त्रकोषाणां माध्यमेन साक्षात् कक्षायां योजयितुं शक्यते । तादृशानां केषाञ्चन तन्त्रकोषाणां नामानि सन्ति – ज़ूम् मीटिङ्ग्, गूगल् मीट्, मैक्रोसोफ़्ट् टीम्स् इत्यादीनि । एतेषु तन्त्रकोषेषु भवता/भवत्या प्रथमं पञ्जीकरणं करणीयम्।)
- वैश्विक-स्थान-निर्धारण-प्रणाल्या (जी.पी.एस्/लोकेशन्) समीचीनदिशः मार्गस्य च ज्ञानम्।
- चलदूरवाण्यां विभिन्नानां क्रीडाणां क्रीडणम्।
- फ़ेस्बुक् इत्यस्य उपयोगः।
- आकाशवाण्याः (रेडियो) श्रवणम्।
- ध्वनिमुद्रणम्।
- गीतगानं, कथावाचनम् इत्यादीनां चलच्चित्रनिर्माणम्।
- तापमानस्य अवलोकनम्।
- निकटस्थाः भोजनालयाः पथिशालाः चिकित्सालयाः विद्यालयाः रेलस्थानकानि उद्यानानि इत्यादीनां ज्ञानम्।

■ पश्यन्तु, पठन्तु चर्चां च कुर्वन्तु ।

अधः प्रदत्तेषु भवान्/भवती स्वस्य चलदूरवाण्यां केषाम् उपयोगं करोति ? समीचीन-उत्तरस्य पुरतः (✓) इति चिह्नं स्थापयतु ।




घटी



दिनदर्शिका



वाट्स्-एप्



संक्षिप्त-सन्देश-सेवा




गणकयन्त्रम्



गूगल्-मेप्




यू-ट्यूब्



ई-पत्रम्




फ़ेसबुक



संपर्क-सूची




दीक्षा




करदीपः


शिक्षक-निर्देशः — सहभागिनः प्रत्येकं चित्रस्य परिचयं कारयन्तु । चित्रस्य अधः लिखितं शब्दं वक्तुं प्रेरयन्तु । एतेषाम् उपयोगस्य विषये चर्चां कुर्वन्तु । केचन सहभागिनः एतैः वस्तुभिः सह परिचिताः न स्युः, प्रयोगं कर्तुम् अपि न जानीयुः ।

अन्तर्जालीय-सुरक्षायाः ज्ञानम् (साइबर-सुरक्षा)









दशम-सप्ताहः
१०

सहायता-सङ्ख्या
1930



वञ्चन-सन्देशेषु विद्यमानानि
सूत्राणि (लिङ्क्स) न उद्घाटयन्तु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

एकादश-सप्ताहः
११

सहायता-सङ्ख्या
1930



भवान्/भवती अन्तर्जाले यत् किमपि
पठति तेषु सर्वेषु विश्वासं न करोतु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

चतुर्दश-सप्ताहः
१४

सहायता-सङ्ख्या
1930



वैयक्तिक-भावचित्राणाम् अन्तर्जाल-
माध्यमेन प्रेषणं सम्यक् विचिन्त्य
एव करोतु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

विंशतितम-सप्ताहः
२०

सहायता-सङ्ख्या
1930



यदि भवान्/भवती आन्तर्जालिक-
अपराधेन पीडितः जातः/जाता तर्हि
अवश्यं तस्य प्रतिवेदनं करोतु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

चतुर्विंशतितम-सप्ताहः
२४

सहायता-सङ्ख्या
1930




स्वस्य चलदूरवाणीं तस्याः
उपकरणानि वा अपरिचित-जनाय
न ददातु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

अष्टाविंशतितम-सप्ताहः
२८

सहायता-सङ्ख्या
1930



आन्तर्जालिक-विधीन् जानातु।
अन्तर्जाल-माध्यमेन कार्य-करण-
समये तासां पालनं च करोतु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

अष्टत्रिंशत्तम-सप्ताहः
३८

सहायता-सङ्ख्या
1930



अन्तर्जालद्वारा वैयक्तिक-विवरणानि
कस्मैचित् अपि न ददातु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

त्रिचत्वारिंशत्तम-सप्ताहः
४३

सहायता-सङ्ख्या
1930



नि:शुल्क-उपहार-दातृभ्यः आन्तर्जालिक -
वञ्चकेभ्यः सावधानः भवतु।

परिवाद-निमित्तम्
https://cybercrime.gov.in

विद्यालयीय-प्रणाली-निमित्तं मार्गदर्शिका
https://ciet.nic.in/pages.php?id=book-let-on-cyber-safetysecurity&ln=en&ln=en

शिक्षक-निर्देशः— प्रदत्तचित्रैः सहभागिनः अन्तर्जालीय-सुरक्षायाः विषयं बोधयामः । सहभागिभिः सह 'नेटिकेट्' अर्थात् अन्तर्जालीय-शिष्टाचारस्य विषये चर्चां कुर्मः । एतदर्थम् अधः प्रदत्तस्य सूत्रस्य उपयोगं कर्तुं शक्नुमः। https://ciet.nic.in/flipbook/200-COPY-Cyber-Safety-Pocket-Book-HINDI-W-3-5inch-X-H-5inch/index.html#page=1

वर्णमाला

स्वरवर्णाः

अ आ इ ई उ ऊ ऋ ॠ ऌ

ए ऐ ओ औ


अं अनुस्वारः अः विसर्गः

व्यञ्जनवर्णाः

क	ख	ग	घ	ङ	स्पर्श-वर्णाः
च	छ	ज	झ	ञ	
ट	ठ	ड	ढ	ण	
त	थ	द	ध	न	
प	फ	ब	भ	म	
य	व	र	ल		अन्तःस्थ-वर्णाः
श	ष	स	ह		ऊष्म-वर्णाः

संयुक्तवर्णाः

क्ष त्र ज्ञ श्र द्य



विद्ययाऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING